त्यारे ए वैद्ये ए जलोदरीने साजो कर्यो, व्याधि मटीने सारो थयो. वैद्ये तेने उपाडवाने औषधकोथळो दीधो, ते पण औषधकोथळो उपाडीने ते वैद्यनी पाछळ फरतो हतो त्यां दैवमायाने लीधे ते कोथलामां भार अत्यंत वधतो गयो, ए भार उठावतां ते थाकी जाय पण तेने छोडीने पाछो जइ शके नहिं. तेणे विचार्युं के–जो हुं पाछो जाउं ने मने वळी जलोदर थइ आवे तो ! आम धारी वैद्यनी पाछळ कोथळो उपाडी फर्या करतो.

---

एकदैकदेशे स्वाध्यायं कुर्वतः साधवो दृष्टास्तत्र तौ गतौ. वैद्येनोक्तं त्वं दीक्षां गृहीष्यसि यथा त्वां मुञ्चामि, स भारभग्नो वक्ति गृहीष्याम्येव, ततो वैद्येनाप्यस्य दीक्षा दापिता, देवे च स्वस्थानं गते तेन दीक्षा परित्यक्ता,

देवेन पुनरपि तथैव जलोदरं कृत्वा वैद्यरूपधरेण पुनरसौ दीक्षां ग्राहितः, पुनर्गते च देवे तेन दिक्षा त्यक्ता, तृतीयवारं दीक्षां दापयित्वा वैद्यरूपो देवः सार्धं तिष्ठति स्थिरीकरणाय.

---

एक समये एक प्रदेशमां साधुओने भणता; जोइ वैद्ये पेलाने कह्युं के दीक्षा ग्रहण करीश ? तो तने मुक्त करुं. तेणे भार उपाडीने कंटाळेल तेथी कह्युं के–' हा दीक्षा ग्रहण करीश त्यारे वैद्ये तेने साधु पासे दीक्षा देवरावी पण ए देव स्वस्थाने गया एटले आणे दीक्षा छोडी दीधी. देवे पाछुं तेने जलोदर करी मूक्युं. फरी पण ए देवे वैद्यरूप लइ दीक्षा लेवरावी. वळी पण देव गया के आणे दीक्षा त्यजी दीधी एटले त्रीजीवार देवे वैद्यरूपे आवी दीक्षा लेवरावी दृढ राखवा पोते देव साथे रहेवा लाग्या.

---

एकदा तृणभारं गृहीत्वा स देवः प्रज्ज्वलद्ग्रामे प्रविशति. ततस्तेन साधुनोक्तं ज्वलति ग्रामे कथं प्रविशसि ? देवेनोक्तं त्वमपि क्रोधनमानमायालोभैः प्रज्ज्वलिते गृहवासे वारंवारं वार्यमाणोऽपि पुनः कथं प्रविशसि? वैद्यरूपेण देवेनैवमुक्तोऽपि स नबुध्यते.

---

एक समये ते देव खडनो भारो लइ बळता गाममां पेठा त्यारे ए साधुए कह्युं के–' बळता गाममां केम पेसो छो ? ' देवे कह्युं–तुं पण–क्रोध मान माया लोभ वगेरेथी बळता घरवासमां वारंवार वार्या छतां केम पेसतो जाय छे ?' वैद्यरूपी देवे आम कह्युं तथापि ते समज्यो नहिं.

अन्यदा तावटव्यां गतौ, देवः कंटकाकुले मार्गे चरति, स प्राह कस्मादुन्मार्गेण यासि ? देवेनोक्तं त्वमपि विशुद्धं संयममार्गं परित्यज्याधिव्याधिरूपे कंटकाकीर्णे संसारमार्गे कस्माद्यासि ? एवं देवेनोक्तेऽपि स न बुध्यते. पुनरेकस्मिन् देवकुले तौ गतौ, तत्र यक्ष ईप्सितपूजापूज्यमानोऽपि पुनः पुनरधोमुखः पतति. स कथयत्यहो यक्षस्याधमत्वं ! यत्पूज्यमानोऽप्ययमधोमुखः पतति, देवेनोक्तं त्वमप्येतादृशोऽधमः, यद्वंद्यमानः पूज्यमानोऽपि त्वं पुनः पुनः पतसि.

वळी एक टाणे बेय जणा अटवी=जंगल=मां गया त्यां देवे कांटावाळा मार्गे चालवा मांडयुं ते जोइने आ साधु बोल्यो के= आम अवळे मार्गे केम चालो छो ? त्यारे देवे कह्युं के–तुं पण विशुद्ध संयम मार्गनो परित्याग करी आधिव्याधिरूप अनेक कंटकथी व्याप्त एवा संसार मार्गमां केम जाय छे? आवो उपदेश करतां पण ज्यारे ते साधु समज्यो नहिं त्यारे वळी एक वखते ए बेय जणा एक देवकुळमां पेठा. त्यां तो एक यक्ष तेने मनमानती पूजाथी पूजता छतां वारंवार उंधेमुखे पडतो दीठो. त्यारे साधु बोल्यो के–' अहो ! आ यक्षनी अधमता तो जुओ, आवी रीते पूजाय छे तो पण उंधेमोढे पडेछे ' देवे कह्युं–'तुं पण एना जेवोज अधम छो जे वंदन करतां पूजा पामतां पण फरी फरीने पाछो पडेछे. '

ततः स साधुर्वक्ति कस्त्वं ? देवेन मूकरूप दर्शितं, पूर्वभवसंबंधश्च कथितः, स वक्त्यत्र कः प्रत्ययः ? ततो वैताढ्ये चैत्यवंदापनार्थं देवेनासौ प्रापितः. तत्रैकस्मिन् सिद्धायतनकोणे दुर्लभबोधदेवेन स्वबोधाय मूकविदितं स्वकुंडलयुगलं स्थापितमभूत्, तत्तदानीं दर्शितं, ततस्तस्य जातिस्मरणं जातं, तेनास्य चारित्रदृढताभूत्, अस्य पूर्वमरतिः, पश्चाद्रतिः. ॥ ७ ॥

आ वचन सांभळी साधु बोल्यो के–'तमे कोण छो ?' त्यारे देवे पोतानुं प्रथमनुं मूंगा तरीकेनुं रूप देखाडयुं; अने पूर्वभवनो संबंध पण कह्यो. ते साधु बोल्यो– तमे कहुं तेनी खात्री शी ?' त्यारे देव तेने वैताढ्यस्थाने चैत्यवंदनार्थ लइ गया त्यां एक सिद्धायतनना खूणामां दुर्लभबोधि देवे पोतानी जाण माटे पेला मूंगानो जाणेल बे कुंडळ राखेलां हता ते तेने देखाड्यां ते जोतांज तेने जातिस्मरण थयुं अने तेथी तेनुं चारित्र दृढ थयुं. आवी रीते प्रथम तेने अरति हती अने पाछळथी रति थइ. ७

अथ संयमेऽरति सद्भावे सति स्त्रीष्वीहा स्यात्, स च परिषहोऽपि सोढव्यः. अतस्तत्परीषहमाह—

संयममां ज्यारे अरति थाय त्यारे स्त्रीओमां ईहा=अभिलाषा=थाय ते पण परीषह सहन करवो जोइए–ते परीषह कहे छे.—

संगो एस मणुस्साणं । जाओ लोगंमि इत्थीओ ॥ जस्स एआ परिण्णाया । सुकडं तस्स सामण्णं ॥१६॥
एयमादाय मेहावी । पंकभूया उ इत्थीओ ॥ नो ताहिं विहन्निज्जा । चरेज्जत्तगवसए ॥ १७ ॥

(लोगंमि) आ संसारमां (जाओ) जे (इत्थिओ) स्त्रीओ छे (एस) ए स्त्रीओ (मनुस्साणं) मनुष्योने (संगो) बंधनरूप छे (जस्स) जे साधुने (एसा) स्त्री (परिण्णाया) परिभाग करेल छे (तस्स) ते साधुए (सामणं) चारित्र (सुकडं) सारुं कर्युं छे=पाड्युं छे. (मेहावी) बुद्धिमान् साधु (इत्थिओ) स्त्रीओ (पंकभूया उ) कादवरूप छे (ए अं) ए प्रमाणे (आदाय) बुद्धिवडे जाणीने (ताहिं) ते स्त्रीओ वडे (नो विहन्निज्जा) पोते विहत न थतां (जत्तगवेसए) आत्म भगवेषक थइने (चरेज्ज) धर्मानुष्ठान करे.

व्या०—लोकेऽस्मिन् संसारे मनुष्याणामेताः स्त्रियः संगो जातोऽस्ति नराणां स्त्रियो बंधनं वर्तते, यथा

मृगाणां बंधनं वागुरादि विद्यते, संगत्थत्ति वशीभवतीति. जीवो यस्मात्स संगो बंधनमित्यर्थः, अत्र मनुष्यग्रहणं तेषामेव मैथुनसंज्ञाया आधिक्यात्, यथा मक्षिकाणां श्लेष्मसंगो बंधनं, तथा पुरुषाणां स्त्रियो बंधनमित्यर्थः, यस्य साधोरेताः स्त्रियः परि समंताद् ज्ञपरिज्ञया ज्ञाताः प्रत्याख्यानपरिज्ञया प्रत्याख्याताः परित्यक्ताः, अनर्थहेतुरूपा ज्ञाताः, अत्र प्राकृतत्वात्तृतीयास्थाने षष्ठी, येन साधुना स्त्रिय एतादृशो ज्ञातास्तस्य साधोः श्रामण्यं सुकृतं साध्वाचारः सफलः ॥ १६ ॥

---

अर्थः—लोकमां–आ संसारमां–मनुष्योने स्त्रीओ एकसंगरूप थयेल छे. अर्थात् नरने स्त्रीओ बंधनरूप छे. जेम मृगलांओने जाल बंधनरूप छे. अर्थात् मृगलां जेम वागुर=जाळ=मां फसाय छे तेम मनुष्यो स्त्रीओमां वश थइ जाय छे. जीवने क्यांय पण संग थाय ते बंधनज छे. अहीं मनुष्य पद राख्युं छे ते मनुष्यमां संसार धर्मनी अधिकता दर्शाववा माटे छे. जेम मांखीने लाळ लींट वगेरेनो संगथवाथी तेमां चोटी रहेतां बंधन थाय छे तेम पुरुषोने स्त्रीओ बंधन छे. जे साधुए ए स्त्रीओ परिज्ञात करी–अथात् सर्व प्रकारे प्रत्याख्यात=परित्यक्त=करी, एटले के ए स्त्रीयोने अनर्थरूप जाणीने परहरी ते साधुनुं श्रामण्य=साधुपणुं=सुकृत थयुं. ए साधुनो आचार सफळ थयो. ॥ १६ ॥

---

मेधावी धर्ममर्यादावांस्ताभिः स्त्रीभिर्न विहन्यात्, संयमजीवितघातेनात्मानं न विनाशयेत्, किंत्वात्मगवेषकः सन् चरेत्, आत्मानं गवेषयतीत्यात्मगवेषकः, किं कृत्वा ? एवमादायैतद् ज्ञात्वा, एतदिति किं ? स्त्रियः पंकभूताः,

मुक्तिमार्ग कर्दमभूताः, मुक्तिपथप्रवृत्तानां बंधकत्वेन मालिन्यकारणं स्त्रियः संतीति ज्ञात्वा तस्माम् स्त्रीणां संगं विहाय मया संसारादात्मा निस्तारणीयः, इति बुद्धिमान्.

मेघावी=धर्ममर्यादावान् ते स्त्रीओवडे विहत थतो नथी–अर्थात् संयम जीवितनो घात करी आत्मानो विनाश करतो नथी. किंतु आत्मगवेषक थइने, अर्थात् आत्मस्वरूपनी शोधमां तत्पर रही, स्त्रीओ पंकभूत छे एटलेके मुक्ति मार्गमां कादवरूप छे.–केमके मुक्तिमार्गे पळेलाने बंधक तथा मलिनता कारणभूत छे तेथी ए स्त्रीओनो संग त्याग करीने मारे संसारथी आत्मानो निस्तार लाववानो छे एवी बुद्धि धारण करे छे.

अत्र स्थूलिभद्र कथा यथा—पाटलिपुत्रनगरे नवमो नंदराजा, तस्य राज्यचिंताकारकः शकडालनामा मंत्री वर्तते, तेन स्ववृद्धपुत्रः स्थूलभद्रनामा लीलाविलासार्थं तन्नगराधिवासिन्याः कोशावेश्यायाः गृहे मुक्तस्तत्र तस्या मार्गितं सुवर्णादि यथेष्टं प्रेषयति, द्वितीयपुत्रः श्रीयकनामा राजांगपार्श्ववर्ती विहितः अस्मिन्नवसरे तन्नगरवास्तव्यो वररुचिनामा भट्टो नवीनकृतैरष्टोत्तरशतकाव्यैर्नंदभूपालं प्रत्यहं स्तौति, राजा च तस्मै द्रव्यदित्सुः शकडालमंत्रिमुखं विलोकते, शकाडालमंत्री तु मिथ्यात्ववृद्धिभीरुर्न तत्काव्यानि स्तौति.

—आ विषयमां स्थूलभद्रनी कथा दृष्टांतरूप कहे छे.—

पाटलिपुत्र नगरमां नवमो नंदराजा राज्य करतो हतो त्यारे तेनो राज्यचिंताकार शकडाल (शकटार) नामे मंत्री हतो. तेणे

पोतानो महोटो पुत्र स्थूलभद्र नामनो हतो तेने ते नगरमां रहेनारी कोशा नामनी वेश्याने त्यां लीलाविलासार्थ राख्यो ते जे कंइ पोतानी इच्छा प्रपाणे सुवर्णादि मागे ते मोकलावतो बीजो श्रीयक नामनो पुत्र हतो तेने राजा पासे अंगत जण तरीके राख्यो. आ अवसरमां ते नगरमां वसनार एक वररुचि नामनो भट रोज एकसोआठ नवां काव्य नंदराजानी स्तुतिनां रचीने राजाने संभळावतां त्यारे राजा तेने द्रव्य देवानी इच्छाथी शकडाल मंत्रीना मुख सामु जुए पण शकडाल मंत्री तो जगत्मां मिथ्यात्वनी वृद्धि थाय एवी बीकथी ते वररुचिना काव्यनां वखाण करता नहिं.

मंत्रीप्रशंसां विना राजा तस्मै न किंचिद्दत्ते, वररुचिना तु मन्त्रीभार्यां स्ववचनामृतेन तोषिता स्वभर्तारं शकडालमंत्रीणं प्रत्याह वररुचेः काव्यानि त्वया नृपपर्षदि व्याख्येयानि, यथास्थितवस्तुप्ररूपणे सम्यक्त्वस्य भूषणं न तु दूषणमित्यादि स्ववनितावचोयुक्त्या तत्काव्यप्रशंसनं प्रतिपन्नं.

अने मंत्री प्रशंसा न करे त्यां सुधी राजा ए कविने कंइपण दइ शकता न होतां–वररुचिए मंत्री शकडालनी भार्याने पोताना वचनामृतथी संतुष्ट करी त्यारे तेणीए पोताना पति शकडाल मंत्रीने कह्युं के–आ वररुचिनां काव्योनी राजसभामां आपे प्रशंसा करवी. केमके वस्तुनुं यथार्थ प्ररूपण करवुं ए सम्यक्त्वनुं भूषण छे कंइ दूषण न कहेवाय, आवां पोतानी स्त्रीनां युक्तियुक्त वचोनोथी ते वररुचिनां काव्योनी प्रशंसा करवानुं कबूल कर्युं.

प्रभाते पर्षदि भूपतेः पुरो वररुचिप्रोक्तानि काव्यानि मन्त्रिणा प्रशंसितानि, तत्प्रशंसानंतरमेव राज्ञा

वररुचिभट्टाय दीनाराणामष्टोत्तरशतं दत्तं. ततः प्रतिदिनं विप्रो भूपतेः पुरोऽष्टोत्तरशतकाव्यानि नवीनानि वक्ति, स्तुतिप्रांते भूपप्रदतं दिनाराष्टशतं गृह्णाति, ततो वृद्धिमान् वररुचिनामा भट्टः शतसहस्रवित्तव्ययेन यागहोमादि करोति.

सवारमां राजानी सभामां गया. त्यां वररुचिए काव्य संभळाव्यां तेनी मंत्रीए प्रशंसा करी ते मंत्रीकृत प्रशंसा सांभळी तरतज राजाए कवि वररुचिने एकसो आठ दीनार आप्यां आम प्रतिदीन एकसो आठ काव्य रचीने सभामां आवी संभळावे अने राजा ए वररुचि कविने रोज एकसो आठ दीनार आपे एम करतां वररुचि भट्ट तो समृद्धिमान् थयो अने सेंकडो तथा हजारोगमे द्रव्य वावरीने यागहोमादिक करवा लाग्या.

मन्त्री तु तथा वर्धमानं मिथ्यात्वं दृष्ट्वा तद्दाननिषेधाय राज्ञः पुर एवमुवाच हे राजन्नस्य ब्रह्मणस्यैतावद्धनं दत्त्वा कथं कोशक्षयो विधीयते ? अयं तु परकाव्यहरणात्कवितस्करोऽस्ति, राज्ञोक्तं किमसौ पुरातनकवितानि काव्यानि मत्पुरो वक्ति ? मन्त्रीणोक्तमेतदुक्तानि काव्यानि सप्तापि मत्पुत्र्यः पठंति, राज्ञोक्त प्रातरेतदुक्तानि काव्यानि तव सप्तपुत्रीपार्श्वे पाठनीयानि.

मंत्रीए तो आम वधतुं जतुं मिथ्यात्व जोइ ते दाननो निषेध करवा राजा आगळ कह्युं-हे राजन् ! आ ब्राह्मणने आटलुं बधुं धन दइने शुं खजानानो क्षय करवा धार्यो छे ? आ ब्राह्मण तो पारका काव्य हरीने कविचोर छे. राजाए

कह्युं-शुं ते कवि कोकनां करेलां पुराणा काव्य मारी पासे बोले छे ? मंत्रीए कह्युं क-जे काव्यो ए बोले ते मारी सात दीकरीओ बोली देखाडे तो आपने खात्री थायने ? राजाए कह्युं-त्यारे सवारे ए काव्य बोले ते तमारी साते पुत्रीओ पासे बोलाववा.

ततो मन्त्रिणा सर्वं शिक्षयित्वा सप्तापि पुत्र्यः प्रभाते भूपपर्षदि यवन्यंतरिताः स्थापिताः, ताश्च क्रमात्प्रथमा पुत्र्येकवारश्रुतसर्वग्रन्थधारिका, द्वितीया तु द्विर्वारश्रुतसर्वग्रंथधारिका, एवं सर्वा अपि यावत्सप्तमी पुत्री सप्तवारश्रुतग्रन्थधारिका. एतादृशधारणान्विताः संति.

मंत्रीए घरे जइ पोतानी सात पुत्रीओने शिखवीने सवारे राजसभामां चक नाखीने बेसाडी आमांनी पहेली पुत्री एकवार सांभळेल सर्व ग्रंथ धारण करनार हती. बीजी बे वार सांभळी धारण करनारी; एम क्रमथी सातमी पुत्री सातवार सांभळेलुं धारण करनारी हती.—

अथ तत्र समायातो वररुचिः स्वकृतकाव्यानि नृपतेः पुरो वक्तुमारेभे, स्तुत्यंते भूपतिनोक्तमहो भट्टैतानि काव्यानि त्वत्कृतानि परकृतानि वा ? सोऽवग्मत्कृतान्येव. राज्ञोक्तमेतानि काव्यानि मन्त्रिणः सप्तपुत्रीणां मुखे समायांति, स वक्ति यदि ता वक्ष्यंति तदाहमसत्यः, एवं तेनोक्ते यवन्यंतराद्यक्षानाम्नी प्रथमापुत्री भूपतेः पुरः समागत्यसर्वाणि तानि काव्यानि पपाठ.

सभामां वररुचि आव्यां अने स्वकृत काव्य राजानी आगळ बोलवा मांडयां त्यारे स्तुतिने अंते राजाए कह्युं के-अहो ! भट्ट !

आ काव्य जे बोल्या ते तमारां रचेलां छे के परकृत छे ? वररुचि बोल्या के-'मेंज रचेलां छे.' राजाए कह्युं के ए काव्यो मंत्रीनी साते पुत्रीओने मुखपाठ आवडे छे ' भट्ट बोल्या के-' जो ते पुत्रीओ बोली देखाडे तो हुं खोटो ' आम ए कवी बोल्या ते वखते चकमां उभेली मंत्रीनी यक्षा नामनी पहेली पुत्रीए राजानी आगळ आवी ते सर्वे काव्य भणी देखाडया.

एवं क्रमात्सर्वा अपि तानि काव्यानि पेठुः, तथा प्रज्ञासद्भावात्ततो निष्कासितो राजकुलाद्वररुचिर्भूपेन, सभाजनेन च तिरस्कृतः सर्वत्रापमानं प्राप्तः. अथ तेनेत्थं कपटं प्रारब्धं, संध्यायां गंगाजलांतर्यंत्रं कृत्वा दीनारपंचशतीं मुक्त्वा प्रभाते तत्र गत्वा गंगां स्तौति, स्तुत्यंते लोकसमक्षं जलयंत्रग्रन्थिपादिनाक्रम्य हस्ते गृहीत्वा जनेभ्यो दर्शयति मत्स्तुतिरंजिता गंगा मह्यमेवं दत्ते.

एम क्रमे सात पुत्रीओ काव्य बोली रही त्यारे राजकुलमांथी वररुचिने निकाली मूक्या तेम सभाजनोए पण तिरस्कार कर्यो एटले कवि सर्वत्र अपमान पामी खीन्न थया. हवे आ कविए एक कपट आरंभ्युं—सन्ध्याटाणे जइ गङ्गाजळनी अन्दर पांचसो दीनारनी पोटली यन्त्र ( कमान )थी दबावी मूकी आवे अने सवारे त्यां जइ नाहीने गंगाजीनी स्तुति आदरे ते स्तुति थइ रहे त्यारे जळनी अंदर यन्त्रनी जे गांठ होय तेने पगवती दबावे के पेली पांवसो दीनारनी पोटली उपर हाथमां आवे ते लोकोने देखाडे ने कहे के मारी स्तुतिथी प्रसन्न थइ गंगा मने आ दीनार आपे छे.

राज्ञा तु कार्पण्यान्ममासत्कलंकमारोप्य तिरस्कारः कृत इति च वदति, तद्वार्ताश्रवणाल्लज्जितो राजा तद्वृत्तांतं

शकडालमंत्रिणोऽग्रे कथयामास, मंत्रिणा तत्र चरप्रेषणेन तज्जालयंत्रं ज्ञात्वा दीनारपञ्चशतग्रन्थिमानाय्य स्वकरे धृतः, प्रभाते तत्र भूपतिः स नगरलोकस्तत्रायातः, वररुचिरपि गंगां स्तौति, स्तुत्यंते पादाक्रमणे हस्ताभ्यां च जलमालोडन्नयपि न ग्रन्थिमाप्नोति, विखिन्नो वररुचिः, मन्त्रिणैवमुक्तं भो वररुचे! तव कल्ये किं ग्रन्थिक्षेपो विस्मृतः? किं वा क्षिप्तोऽपि दीनारग्रन्थिरन्येनापहृतः ? यद्वा नंदराज्ये परद्रव्यापहारी कोऽपि नास्तित्युक्त्वा स ग्रंथिः सर्वजनानां भूपतेर्वररुचेश्च दर्शितः, चरणप्रेषणवृत्तांतश्च प्रकटितः.

---

राजाए तो क्रपणतानेलीधे मारा उपर खोटुं कलंक आरोपी तिरस्कार कर्यो, आम बोले ते वात राजाए सांभळी त्यारे शरमाइने ए वात राजाए शकडाल मंत्री आगळ कही. मंत्रीए छुपा दूत मोकलीने ए जाळयंत्रनी हकीकत जाणी लइ पांचसो दीनारनी पोटली गंगामांथी कढावीने पोताना हाथमां लीधी. सवारमां नगरना लोको सहित राजा गंगाजी उपर जोवाने आव्या. वररुचिए गंगानी स्तुति करवा मांडी. स्तुतिने अंते पगे दबावी हाथेथी जळ डोळवा मांड्युं पण पोटली न जडी त्यारे वररुचि खिन्न थयो. मंत्रीए कह्युं के—वररुचि! काले गांठडी नाखवानुं भूली गया छो के नाखेली दीनारनी गांठडी कोइ उपाडी गयुं छे ? यद्वा आ नंदराजाना राज्यमां परद्रव्यनुं अपहरण कोइ करेज नहिं ? आम कहीने ते गांठडी सर्वजनोने तथा राजाने देखाडी अने छुपो दूत मोल्या बाबतनो वृत्तांत पण जाहेर कर्यो.

---

ततो लोकैर्धिक्कृतः, खिन्नो वररुचिर्मुखमाच्छाद्य मन्त्रिदत्तं च ग्रंथिं लात्वा स्वगृहे गतः, ततःपरं मन्त्रिच्छिद्राणि

विलोक्यते, परं न पश्यति, ततो मन्त्रिगृहदास्या सह स स्नेहं चकार, तद्गृहवार्तां च पृच्छति, सापि तत्स्नेहलुब्धा सर्वं कथयति. अन्यदा तस्याग्रे तया प्रोक्तमधुना श्रीयकविवाहः समायातोऽस्ति. राजानं गृहे आकारयिष्यति, तत्सत्काराय नवीनच्छत्रचामरसिंहासनशस्त्रादिसामग्री जायमानास्ति.

---

आथी सर्व लोकोए धिक्कार करवाथी वररुचि अत्यंत खिन्न थइ मोढुं ढांकीने मंत्रीए आपेल पोटली लइने पोताने घेर गयो. आ बनाव पछी वररुचिए मंत्री शकडालना छिद्र गोतवा मांड्यां पण क्यांय जोवामां आवे नहिं त्यारे तेणे मंत्रीना घरनी दासी साथे स्नेह बांध्यो अने ए दासी द्वारा मंत्रीना घरनी सर्व बात पूछवा लाग्यो, ते दासी पण वररुचिना स्नेहमां लोभाइ बधुं तेने कहेवा लागी, एक वखते ते दासीए वररुचि पासे आवीने कह्युं के–' हमणां श्रीयक ( शकडालनो नानो पुत्र ) नो विवाह आवे छे ते मंत्री पोताने घरे राजाने जरुर बोलावशे ते वारे राजानो सत्कार करवा माटे हालमां नवीन छत्र चामर सिंहासन शस्त्र आदिक सामगरी बनाववानी तैयारी चाली रही छे.

---

ततो वररुचिश्छिद्रं मनसि कृत्वा नागरिकर्डिभान् मोदकदानेनेदं पाठयति—नंदराय नवि जाणई । ज सगडाल करेसि ॥ नंदराय मारी उ करी । सिरिय उ राज ठवेसि ॥ १ ॥ पठंति ते तथैव मार्गे मार्गे, तद्राजवाटिकां गच्छाता राज्ञाश्रुतं, मंत्रिगृहे चराः प्रेषितः, तैस्तत्र छत्रादिसामग्री जायमाना दृष्टा, राज्ञोऽग्रे कथिता, राजा रुष्टः, प्रभाते प्रणामार्थं गतेन मन्त्रिणा क्रोधवह्निज्वालामालाकुलो दृष्टाः, ज्ञातं च स्वकीयसकलकुटुंबक्षयकारिराजकोपस्वरूपं.

आ वखते वररुचिए छिद्र कल्पना करी नगरना बालकोने मोदक आपीने एक गाथा बोलवानुं चालु कर्युं, गाथानो अर्थ एवो छे के—' नंदराय नथी जाणतो जे शकडाल करशे रायने मारीने श्रीयकने राज उपर थापशे. ' आ गाथा बाळको मार्गे मार्गे बोलतां फरतां हतां ते राजवाडीए जतां राजाए सांभळ्युं. तरत मंत्रीने घरे छुपा दूतो मोकल्या त्यां तेओए छत्रादि सामग्री तैयार थती दीठी अने राजा आगळ आवी हकीकत कही राजा रोषे भराणो. सबारमां मंत्री ज्यां सलागे जाय त्यां तो क्रोधाग्निनी ज्वालाओथी राजाने आकुळ जोया, मनमां समजी गयो के आ टाणे राजाना कोपनुं स्वरूप मारा सकल कुटुंबनो क्षय करीनाखे एवुं जणाय छे.



त्वरितमेव पश्चात्स्वगृहे गतः, श्रीयकस्याग्रे राजकोपस्वरूपमुवाच, एवं च सचिवेन तस्य शिक्षा दत्ता हे वत्स ! कल्ये यदाहं नृपस्य प्रणामं करोमि तदा त्वया खड्गेन मच्छिरश्छेदः कार्यः, अन्यथा सर्वकुटुंबक्षयमसौ करिस्यति मुखक्षिप्ततालपुटविषस्य मम शिरश्छेदे तव न कोऽपि दोष इति पैत्रवचस्तेन महता कष्टेन प्रतिपन्नं.

आम जाणीने तरतज पोताने घरे गयो अने श्रीयकनी आगळ आवी राजाना कोपनुं स्वरूप वर्णवी देखाड्युं अने शकडाल मंत्रीए पोताना पुत्र श्रीयकने कह्युं के—तुं तो वहेलो राजा पासे रोज जाय छे हुं ज्यारे त्यां आवी राजाने जेवो प्रणाम करवा नीचो नमुं के तारे खड्गवती मारुं मस्तक छेदी नाखवुं, जो तुं आम नही कर तो राजा आपणा तमाम कुळनो नाश करावी नाखशे. अने हुं तो मुखमा हरताळनुं विष नाखीने आवीश एटले मारु माथुं कापवानो तने दोष नहिं लागे. आ पितानुं वचन घणीज रगझगने अंते ते पुत्रे कबूल कर्युं.

प्रभाते राज्ञोऽग्रे तथैव कृतं, राजपर्षदि हाहाकारो जातः, राज्ञोक्तं हे श्रीयक ! किमिदं त्वया कृतं ? श्रीयक प्राह हे राजन् ! मम पित्रा न प्रायोजनं किंतु तवाज्ञयां प्रयोजनं यत्तवानिष्टं तन्ममाप्यनिष्टमेवेत्यसौ मया हतः, तुष्टो भूपतिः श्रीयकस्य कथयति त्वं मंत्रिमुद्रां गृहाण ? तेनोक्तं मम वृद्धभ्राता स्थूलभद्रः कोशागृहे तिष्ठति. ततः स्थूलभद्रो नृपेणाकारितस्तत्रायातः, नृपेणोक्तं मन्त्रिमुद्रां गृहाण ? तेनोक्तमालोच्य गृहीष्ये.

---

अने सवारे राजानी पासे तेज प्रमाणे कर्युं. राजसभामां हाहाकर वर्तो रह्यो. राजाए कह्युं के–' अरे श्रीयक ! आ ते शुं कर्युं ? त्यारे श्रीयके उत्तर आप्युं के–' हे राजन् ! मारे बापनुं कंइ प्रोयजन नथी किंतु आपश्रीनी आज्ञानुं प्रयोजन छे. तमारुं जे अनिष्ट ते मारुं पण अनिष्टज मानुं छुं तेथी में आ पिताने मार्यो छे. आ सांभळी राजा तुष्ट थइ श्रीयकने कह्युं के–' मंत्रिनी महोर तुं ग्रहणकर ' तेणे कह्युं के—मारो भाइ स्थूलिभद्र कोशा नामनी वेश्याने घरे रहे छे, राजाए ए स्थूलिभद्रने बोलाव्यो एटले ते राजा पासे आव्यो राजाए कह्युं के–' मंत्रिमुद्रा स्विकारो–अर्थात् मंत्रिनुं सील=महोर लइ मारा मंत्री बनो ' ते स्थूलिभद्रे कह्युं के–विचारीने ग्रहण करीश.

---

ततोऽशोकवाटिकायां गत्वालोचयति संसारस्यानित्यतां, पितृविनाशकारिण्या मुद्रायाः शाकिन्या इव त्यागार्हतामालोच्य लोचोऽनेन कृतः, गृहीता स्वयं तपास्या राजसभायां समायातस्यास्य नृपेणोक्तं भो स्थूलभद्रालोचितं ? स्थूलभद्रो प्राह, लोचितं शिरो मयेत्युक्त्वा गतः स्थूलभद्रः क्वचिन्नगरे संभूतिविजयसूरेः शिष्यो जातः.

ते पछी आशोपालवनी वाडीमां जइने विचार करवा लग्या. विचारने अंते संसारनी अनित्यता तथा पितृविनाश करनारी शाकीनी जेवी मंत्रिमुद्रानो त्याग योग्यता विचारीने तेणे त्यांज लोच कर्यो अने तपस्या स्वयं लइ लीधी राजसभामां स्थूलिभद्र आव्या त्यारे राजाए कह्युं के 'केम स्थूलिभद्र ! विचार करी लीधो ?' स्थूलिभद्रे जवाब आप्यो के 'हा लोचितं शिरः' आ लोचितं=अर्थात् मस्तकनो लोच कर्यो एटले त्याग करीने में तो दीक्षा ग्रहण करी लीधी. आटलुं बोलीने स्थूलभद्र चालता थया. अने कोइ नगरमां जइ संभूतिविजयना शिष्य थया.

---

अथ भ्रातृमोहेन श्रीयकः कोशागृहे आलापनाय गच्छति वदति च हे कोशे ! त्वत्पतिर्मद्भ्राता स्थूलभद्रो यतिर्जातः, त्वत्पतिपिता शकडालश्च क्षयं गतस्तत्कारणमसौ वररुचिर्भट्टो ज्ञेयः, स च त्वद्भगिन्यामुपकोशायां रक्तोऽस्ति, यथेयमुं मद्यपानरतं करोति तथा विधीयतामित्युक्त्वा श्रीयकः स्वगृहे गतः.

---

पेलो श्रीयक भाइना मोहथी कोशाने घेर भाइने बोलाववाने जइने कहे छे के 'हे कोशे ! तारो पति मारो भाइ स्थूलभद्र पति थयो, तारा पतिनो पिता शकडाल पण क्षय पाम्या ए बधानुं कारण आ वररुचि भट्ट जाणवो, अने तेतो तारी बेन उपकोशामां आसक्त छे माटे ए उपकोशा आ वररुचि मद्यपान करवामां परायण थाय एम करे तेवुं कंइक थवुं जोइए' आटलुं कहीने श्रीयक पण पोताने घरे गयो.

---

अथ कोशावचनादुपकोशा तं वररुचिं मद्यपानरतं चकार. ज्ञाततद्वृत्तांता च कोशा मद्यपानमसौ कुर्वन्नस्तीति

श्रीयकायाचख्यौ. अन्यदा राज्ञा शकडालः स्मारितोऽहो गुणवान् शक्तो भक्तो महामंत्री ममाभूत्, ईदृशोऽप्यसौ यदित्थं मृतस्तन्मे मनसि दूयते, इति राज्ञोक्तमाकर्ण्य श्रीयकः प्राह यन्मे पितेत्थं मृतस्तत्र मद्यपानकार्यंयं वररुचिरेव कारणं, श्लोकशिक्षणं डिंभानां तेनैव कृतमित्यादि वार्ता चकार.

कोशाना वचनथी उपकोशाए वररुचिने मद्यपानने व्यसने चडाव्यो, आ वृत्तांत कोशाए जाण्यो ,त्यारे श्रीयकने तेणीए कह्युं के वररुचि हवे खूब मद्यपान करतो थयो छे. एक वखते राजाने पोताना शकडालमंत्रिनुं स्मरण थयुं अने कहेवा लाग्या के–' गुणवान्, शक्तिमान्, भक्त; मारो ए महामंत्री एवी रीते मृत थयो तेथी मारुं मन घणुं दुभाय छे.' आवां राजानां वचन सांभळी श्रीयक बोल्यो ' मारा पिता जे एवीरीते मराणा तेनुं कारण आ मद्यपीनार वररुचिज छे. छोकराओने श्लोक शीखवीने तेणेज बोलाव्या हता.

राजा पप्रच्छ वररुचिः किं मद्यपानं करोति ? श्रीयकः प्राह श्वो दर्शयिष्यामीत्युक्त्वा स्वगृहे श्रीयकः गतः अथ प्रभाते नृपपर्षद्युपविष्टानां सर्वेषां नराणां करेषु संकेतितपुरुषेण कमलानि श्रीयको दापितवान्, मदनफलचूर्णमिश्रितं कमलं च वररुचये दापितवान्, तद्गंधमात्राद्वररुचिना पीतं मद्यं तत्रैव वांतं, राज्ञा तस्य धिक्कारपूर्वं नागरिकविप्रवृन्दवचसा तत्तत्रपुपानं कारितं, स मृतः.

आ वार्ता सांभली राजाए पूछ्युं के—'शुं वररुचि कवि मद्यपान करे छे?' श्रीयके कह्युं के—' हुं आपने काले देखाडीश '

आटलुं कहीने श्रीयक पोताने घरे गयो. बीजे दिवसे सवारे राजसभामां बेठेला सर्व पुरुषोना हाथमां प्रथमथी संकेत आपी राखेला पुरुषने हाथे श्रीयके कमलनां पुष्प देवराव्यां अने मींढलनां चूर्णवाळुं कमळ वररुचिने अपाव्युं तेना गंध मात्रथी वररुचिए पीधेला मद्यनुं त्यां वमन कर्युं. राजाए तेने धिक्कारपूर्वक नगरना ब्राह्मण समुदायना वचनथी तपावेलुं जसत पीवराव्युं तेथी ते मरीगयो.

अथ क्रमाद्विहरंतः स्थूलिभद्रादिशिष्यसहिताः श्रीसंभूतिविजयाचार्याः पाटलिपुरे चतुर्मासकस्थित्यै समायाताः तत्रैकः शिष्यः कृतचतुर्मासकोपवासः सिंहगुहायां गुर्वाज्ञया स्थितः. एकश्च दृष्टिविषसर्पबिले स्थितः, एकः पुनः कूपदारुणि तथैव स्थितः. स्थूलिभद्रस्तु नित्याहारकारि कोशावेश्यागृहे गुर्वाज्ञया स्थितः. कोशया त्वस्य पुरस्तादृशा हावभावा विहिता यथा परमयोगीश्वरोऽपि द्रवति, परमेतस्य मनो न मनागपि क्षुभितं, प्रत्युत सा सुशिला श्राविका विहिता शेषं चरित्रं तु प्रसिद्धमेव. एवं यथा स्थूलिभद्रेण स्त्रीपरिषहः सोढस्तथापरैरपि साधुभिः सोढव्यः.

तेओमां क्रमथी विहार करता स्थूलिभद्रादि शिष्यो सहित श्रीसंभूतिविजयाचार्य चातुर्मास स्थित करवा पाटलिपुत्रनगरमां आव्या. तेमना शिष्योमांथी एक शिष्ये चारमासना उपवास करवा गुरुनी आज्ञाथी सिंहगुफामां स्थिति करी रह्यो; एक बीजो शिष्य जेने जोवाथी झेर चढे एवा दृष्टिविष सर्पना दरमां स्थित थयो; एक शिष्ये वळी कुवाना कांठा उपर स्थित करी अने

स्थूलिभद्र तो नित्य आहार करनारा कोशावेश्याने घरे गुरुनी आज्ञा लइने रह्या. कोशावेश्याए तो एवा हावभाव आदर्या के जेथी परमयोगिश्वर होय ते पण द्रविभूत थइ जाय. पण आ स्थूलिभद्र मुनिनुं मन जराय क्षोभ पाम्युं नहिं. उलटानी ते कोशावेश्या सुशीला श्राविका बनी गइ. बाकीनुं चरित्र प्रसिद्धज छे. आम जेवीरीते स्थूलिभद्रे स्त्रीपरीषह सह्यो तेम अन्य साधु पुरुषोए पण सहन करवो जोइए.

अथैकत्र स्थितस्य मुनेः स्त्रीप्रसंगः स्यात्, अतश्चार्या कार्येति हेतोश्चर्यापरीषहः सोढव्यः, अतस्तमाह—

एकज स्थानमां स्थिति करी रहेनारा मुनिने स्त्रीसंग थाय माटे तेने चर्या=भ्रमण=करता रहेवुं जोइए ए हेतुथी चर्यापरीषह सहन करवानुं निरूपण करे छे.

एग एव चरे लाढे । अभिभूय परीसहे ॥ गामे वा नगरे वावि । निगमे वा रायहाणिए ॥ १८ ॥
असमाणो चरे भिक्खू । नेय कुज्जा परिग्गहं ॥ असंतत्तो । गिहत्थेहिं । अणिकेओ परिव्वए ॥ १९ ॥

मूळगाथार्थः—(लाढे) प्रासुक अने एषणावडे पोतानो निर्वाह करनार साधु (परीषहे) क्षुधादिक परिषहोवडे (अभिभूय) सहन करीने (गामे वा) गामने विषे अने (रायहाणिए) राजधानीमां पण (एग एव) एकलाज (चरे) विचरे ॥ १८ ॥

(भिक्खु) साधु (असमाणो) कोइनी साथे समानता न धरतो (चरे) विचरे (परिग्गहं) परिग्रहने (नेअ कुज्जा) नज करे तथा (गिहत्थेहिं) गृहस्थीओनी साथे (असंमत्तो) संबंधरहित अने (अणिकेओ) घर रहित एवो (परिव्वए) विहार करे. ॥ ३९ ॥

व्या०—लाढः साधुरेक एव चरेत्, लाढयति यापयति आत्मानमेषणीयाहारेण निर्वाहयतीति लाढः, कुत्र कुत्र विचरेत् ? ग्रामे वाथवा नगरेऽपि, अथवा राजधान्यामपि द्रव्येण भावेन चैकाक्येव विचरेत्, तत्र ग्रामः कंटकादिवेष्टितः, नगरं प्राकारादियुक्तं, निगमो वणिग्जनस्थानं, राजधानी राजस्थानमेतेषु विहारं कुर्यात्, परं कीदृशः सन् भिक्षुर्विचरेत् ? असमानः सन् न विद्यते समानो यस्य सोऽसमानः, गृहस्थोऽन्यतिर्थिलोकेभ्योऽधिकः सर्वोत्कृष्टः, पुनः कीदृशः ? गृहस्थैरसंसक्तो गृहस्थैः सहासं मिलितः, पुनः कीदृशः ? अनिकेतः, न विद्यते निकेतो गृहं यस्य सोऽनिकेतोऽनगारः, एतादृशः, सन् परिव्रजेत्. सर्वतो विहरेत्. ॥ १९ ॥

---

अर्थः—एषणीय आहारवडे आत्मानुं लाढन=यापन करे छे तेथी लाढ ए साधुवाचक छे अर्थात् लाढ एटले साधु, परीषहने सहीने एकलोज सर्वदा विचरे. क्यां क्यां विचरे ? ते दर्शावे छे. गाममां अथवा निगममां अने राजधानिमां पण भावथी तथा द्रव्यथी एकाकीज विचरे. कांटानीवाडवाळां गाम कहेवाय, किल्ला गढवाळा. स्थान नगर कहेवाय, वेपारीओनां स्थान निगम अने राजाओ जेमां रहेता होय ते राजधानी गणाय; एवां सर्वस्थानोमां भिक्षुए, असमान=अन्य गृहस्थ के तीर्थिलोक पोताना तुल्य अथवा अधिक=सर्वोत्कृष्ट कोइ साथे न होय तेवी रीते अने गृहस्थथी असंसक्त=अर्थात् कोइ गृहस्थ साथे मळीने नहिं, वळी कंइ परिग्रह न करतां तेमज अनिकेत-कोइपण ठेकाणे पोतानी स्थान कल्पना नहिं करतां अनगार रहीने विचरवुं. ॥ १९ ॥

अत्र संगमस्थविरदृष्टांतः—कोल्लागपुरे संगमस्थविरा बहुश्रुता यथास्थितोपसर्गापवादनिपुणा दुर्भिक्षे गणं देशांतरे प्रेष्य स्वयं नगरं नवभागीकृत्य व्यवस्थिताः, नगरदेवता च तेषां गुणै रंजिता. अन्यदा तत्र गुरुवंदनार्थं दत्तनामा शिष्यः समायातः, तद्भक्त्यर्थं गुरवः सपात्रं तं सार्धं लात्वा भिक्षायां गतः, एकस्येभ्यस्य भद्रकप्रकृतेर्गृहे बालोव्यंतरेण गृहीतः सदा रोदिति.

अहिं संगमस्थविरनुं दृष्टांत कहे छे—कोल्लागपुरमां पूर्वे जेणे घणुं शास्त्र श्रवण करेलुं छे एवा अने ज्यारे कोइ उपद्रव आवी नडे तेना प्रतिकारमां निपुण एवा संगमस्थाविर साथे मळी रहेनाराबहुश्रुतजनो—दुष्काळना समयमां जनसमुदायोने देशांतर मोकली पोते नगरना नव भाग करी व्यवस्था बांधी रहेता हता. नगरदेवता पण तेओना गुणोथी राजी रहेता एक समये त्यां गुरुवंदन करवा दत्तनामनो शिष्य आव्यो तेनी भक्ति जोइ गुरु ते शिष्यने पात्र सहित साथे लइने भिक्षा लेवा गया. एक धनाढ्य भला स्वभाववाळा गृहस्थने घरे बाळकने व्यंतरे गृहीत करेलो तेथी हमेशां रोया करतो.

उपायशतसहस्रकरणेऽपि व्यंतरदोषोपशांतिर्न जाता, गुरवस्तद्गृहे गताः, चप्पुटिकाकरणपूर्वं मा रुद बालेत्युक्तं, आचार्यतपस्तेजसा व्यंतरो नष्टः, तुष्टास्तन्मातृपितृप्रभृतिस्वजनास्तेभ्यो मोदकादिकमाहारं गाढाग्रहेण दत्तवंतः, ते मोदकास्तस्यैव शिष्यस्य गुरुभिर्दत्ता, स्वयं त्वंतप्रांतमाहारं विहृत्य भुक्तवंतः.

सेंकडो हजारो उपायो करतां पण ए व्यंतरनी उपशांति न थइ त्यारे गुरुओ तेने घरे गया. चपटीयो वगाडीने 'हे

बाळ ! रोमां ' आम कहेतांनी साथे आचार्यना तपःसामर्थ्यवडे व्यंतर नाठो अने बाळक रोतो रही गयो तेथी ते बाळकनां माता-पिता आदिक स्वजन संतोष पामी घणा आग्रहथी आचार्यने मोदकादिक आहार आप्यो. आम मोदकादिक जे मळ्युं ते गुरुए शिष्यने आपी दइ पोते अंतपांतमांथी वहोरी आवीने भोजन कर्युं.

---

प्रतिक्रमणावसरे तस्य शिष्यस्य पिंडदोषमालोचयेति गुरुभिरुक्तं, शिष्यश्चिंतयत्यसौ धात्रिपिंडं सदा भुंक्ते, ममत्वेवं कथयतीति चिंतनसमय एव तद्भापनार्थं देवतयांधकारं विकुर्वितं, स भृशं बिभेति, गुरुं प्रति च वक्ति अहमत्र दूरस्थो बिभेमि, गुरुवः प्राहुरेहि मत्समीपे ? स वक्त्यस्मिन् घोरांधकारे नाहमागंतुं शक्नोमि, गुरुभिस्थूत्कृतकृतलिप्सा स्वांगुली दर्शिता, तदुद्योतेन सोऽत्रायातः, परं चिंतयति गुरवो दीपकं रक्षयंति.

---

प्रतिक्रमण अवसरे ते शिष्यने ' आहारदोषनी आलोचना करो ' आम गुरुए कह्युं त्यारे शिष्य मनमां चिंतन करवा लाग्यो के-' गुरु पोते तो धात्रिपिंड=( धाव्यनी पेठे बाळकने रमाडीने-बोलावीने जे भिक्षा लेवी ते धात्रीपिंड नामक भिक्षानो एक दोष गणाय छे. ) सदाय लीये छे अने मने आम टोंके छे, आम ज्यां ए शिष्य मनमां चिंतन करे छे त्यां तेने बीवडाववा देवताए अंधकार करी दीधो त्यारे ते शिष्य अत्यंत व्हीनो अने गुरुने कहेवा लाग्यो के-हुं अत्रे दूर रह्यो बीहुं छुं. गुरुए कह्युं के ' मारी समीपे आव ' त्यारे शिष्ये कह्युं के-' आ घोर अंधकारमां हुं आवी शकतो नथी ' त्यारे गुरुए पोतानी एक आंगळी थुंकवाळी करीने देखाडी तेना उजाळाथी ए शिष्य गुरु पासे आव्यो पण मनमां एम धार्युं जे ' गुरु पोता पासे दीवो राखेछे.'

एवं चिंतयन्नेवासौ देवतया चपेटाभिस्तर्जितः, ज्ञातस्वरूपैर्गुरुभिस्तस्य नवभागीकरणादिकं स्वरूपं प्रकाशितं, यथा संगमस्थविरैर्विहारक्रमापरपर्यायवश्चर्यापरीषहोऽध्यासितस्तथा ग्लानत्वावस्थायामपि क्षेत्रनवभागीकरणेनापि चर्यापरीषहोऽन्यैरध्यासितव्यः.

आवो विचार ए शिष्ये कर्यो के अदृश्य देवताए तेने एक थपाट मारी झाटक्यो. जणायुं छे स्वरूप जेनुं एवा गुरुए तेने नवभागीकरणादिक स्वरूप प्रकाशित कर्युं, जेम संगमस्थविरोए विहारक्रम अपरनामवाळो चर्यापरीषह वेठ्यो तेवी रीते ग्लानतादिक अवस्थमां पण क्षेत्र नवभागीकरण वडे पण चर्यापरीषह अन्य साधुजनोए पाळवो.

अथ यथा ग्रामादिष्वप्रतिबद्धेन चर्या सह्यते, तथा शरीरादिष्वप्यप्रतिबद्धेन नैषेधकीपरीषहोऽपि सहनीयः, अतस्तं परीषहमाह—

जेम ग्रामादिकमां वगर प्रतिबंधे चर्या सहन कराय छे तेमज शरीरादिकने विषये पण अप्रतिबद्धे नैषेधकी परीषह सहन करवो ए समजाववा माटे नैषेधकीपरीषह कहे छे.

सुसाणे सुन्नगारे वा । रुक्खमूले व एगओ ॥ अकुक्कुओ निसीएज्जा । न यं वित्तासए परं ॥ २० ॥
तत्थ से अत्थमाणस्स । उवसग्गाभिधारए ॥ संकाभीओ । न गच्छिज्जा । उट्ठित्ता अन्नमासणं ॥ २१ ॥

मूळगाथार्थः—(सुसाणे) स्मशानमां (सुन्नगारेव) शून्य घरमां (रुक्खमूले व) अथवा वृक्षनी नीचे (एगगो) एकतो (अकुक्कुओ) व्यर्थ लवारो न करतां (निसीएज्जा) बेसी रहे (य) अने (परं) अन्य जनने (न वित्तासए) त्रास न उपजावे. ॥ २० ॥

(तत्थ) त्यां=स्मशानादिकमां (चिट्ठमाणस्स) रहेता एवा (से) ते साधुने कदाच (उवसग्गा) ते उपसर्गोने (अभिधारये) दृढचित्ते सहन करवानुं परंतु (संकाभीओ) शंकाथी भय पामीने (उट्ठित्ता) ते आतापनाना स्थानेथी उठीने (अण्णं असाणं) बीजे स्थाने (न गच्छिज्जा) जाय नहि. ॥ २१ ॥



व्याः—साधुरेकक एकाकी सन् श्मशानेऽथवा शून्यागारे शून्यगृहेऽथवा वृक्षमूले निषीदेदुपविशेत्, परं तत्र कीदृशः सन्? अकौकुच्यः, नास्ति कौकुच्यं यस्य सोऽकौकुच्यः, कौकुच्यं हि भंडविट्चेष्टोच्यते, तया रहितः सम्यक् साधुमुद्रायुक्त इत्यर्थः. पुनः साधुस्तत्र निषण्णः सन् परमन्यं जीवं न वित्रासयेत्, तत्रस्थं जीवं स्थानभ्रष्टं न कुर्यादित्यर्थः. ॥२०॥

अर्थः—साधुए स्मशानमां शून्यागारमां अथवा वृक्षमूळे एकला बेठा रहेवुं अने ते भांड तथा विटना जेवी चेष्टा कर्या विना, अर्थात् शांतिथी साधुमुद्रा धारण करी रहेवुं. अने त्यां बेसीने पर—अन्य कोइ जीवने त्रास आपवो नहिं अर्थात् त्यां स्थिति करी रहेला जीवने स्थानभ्रष्ट करवो नहिं. २०

पुनस्तदेव दृढयति 'तत्थेति' पुनस्तत्र श्मशानादावास्थीयमानस्य भिक्षोर्यदोपसर्गा भवेयुस्तदा तानुपसर्गान् साधुरभिधारयेत्. किमेते उपसर्गा वराका मम करिष्यंति? स्वयमेवोपशाम्य यास्यंतीति मतिः कर्तव्येत्यर्थः. परं शंकाभीतः सन् तत आसनादातापनास्थानादुत्थायान्यदासनं न गच्छेत्, आस्यते उपविश्यतेऽस्मिन्नित्यासनं. आतापनास्थानमुच्यते. ॥ २१ ॥

एज अर्थने दृढ करे छे. त्यां–स्मशानादिकमां स्थित थएला भिक्षुने ज्यारे कंइ उपद्रव थाय त्यारे ते उपसर्गोने ए साधुए अभिधारण करवा, एटले 'आ उपसर्गो बिचारा मने शुं करी शकवाना छे? ए उपद्रवो एनी मेळेज उपशांत थइ जशे' आवी मति राखवी पण शंकाभीत–एटले मनमां भयनी आशंका लावीने ते आसनथी अर्थात् ए आ तापना स्थानथी उठीने अन्य आसने जतुं न रहेवुं ॥ २१ ॥

---

अत्र कुरुदत्तसाधुकथा—हस्तिनागपुरे इभ्यपुत्रः कुरुदत्तनामा प्रव्रजितो विहरन् क्रमात्साकेतपुरदूरप्रदेशे प्रतिमायां स्थितः, तत्र चरमपौरुष्यां गोधनापहारिणश्चौराः समायाताः, तत्पृष्टौ त्वरितं गताः पश्चाद्गोस्वामिनः समायातास्तैश्चौरमार्गस्वरूपे पृष्टे स यतिर्न किंचिद् ब्रूते. ततः संजातकोपैस्तैः शिरसि मृत्पालिं कृत्वांगाराः क्षिप्ताः स यतिर्मनाग्नापसृतः, तां वेदनामधिसहमानः सिद्धि गतः एवं नैषेधिकीपरीषहः सोढव्यः

---

—आ विषयमां कुरुदत्त साधुनी कथा दृष्टांत रूपे कहे छे—

हस्तिनागपुरमां एक धनाढ्यनो पुत्र कुरुदत्त नामनो हतो ते प्रव्रज्या=दीक्षा लइ विहार करतो करतो क्रमे करी साकेत=आयोध्या=पुरीथी थोडे दूर प्रदेशमां प्रतिमा=काउसग्ग=एटले शरीरव्यापारनो परित्याग करी स्थिति करी रह्यो हतो त्यांकणे चरमपौरुषी=रात्रीना पाछला पहोरे गायोनां धणने अपहरण करनारा चोर आव्या ते गायोने वाळी तेने पुंठे चालता थया तदनंतर गायोना स्वामी–मालिक–आव्या तेओए 'ए चोर कये रस्ते गया' एम पेला मुनिने पूछ्युं पण तेणे पोताना नियमने आधीन रही कंइपण

उत्तर न आप्युं त्यारे ते गायोना धणीए आ साधुना मस्तक उपर माटीनी पाळ बांधी तेमां अंगारा नाख्या तथापि ते यति जरा पण खस्यो डग्यो नहिं किंतु ते वेदना सहन करतो सिद्धि पाम्यो. एम नैषेधक परीषह सहन करवो.

अथनैषेधिक्यामातापनादिस्थाने स्वाध्यायादिकं कृत्वाशय्यायामुपाश्रये आगच्छेत्, अतस्तत्परीषहमाह—

अथ नैषेधिकीमां अतापनादिस्थाने स्वाध्यायादिक करीने साधु शय्यामां उपाश्रये आवे एतदर्थ शय्या परीषह कहे छे.—

उच्चावयाहिं सिज्जाहिं । तवस्सी भिक्खु थामवं ॥ नाइवेलं विहन्नेज्जा । पावदिट्ठो विहन्नइ ॥ २२ ॥
पइरिक्कुवस्सयं लद्धुं । कल्लाणं अदुव पावगं ॥ किमेगराइं करिस्सई । एवं तत्थ हियासए ॥ २३ ॥

मूळगाथार्थः—(थामवं) दाढ तडका सहन करवाने सामर्थ्यवाळा (तवस्सी)तपस्वी (भिक्खु) साधुए (उच्चावयाहिं) अनुकुळ तथा प्रतिकूल (सिज्जाहिं) शय्या वडे (अइवेलं) वेळा वइ जाय तेवीरीते स्वाध्यादिक कियाने (न विहनेज्जा हणवी नहिं. ॥२२॥

(कल्लाणं) सारा (अदुव) अथवा (पावगं) खराब एवो छतां पण (पइरिक्क) प्रतिरिक्त (उवस्सयं) उपाश्रयने (लध्धुं) पामीने (एगराइं) एक रात्रिना उपयोगथी (किं करिस्सइ) शुं सुख दुःख करवानो छे? (एवं) ए प्रमाणे विचारीने (तत्थ) ते उपाश्रयमां (हिआसए) सुख के दुःखने सहन करे. ॥ २३ ॥

व्या०—तपस्वी भिक्षुरुच्चावचाभिः शय्याभिरुपाश्रयैः कृत्वा स्थामवान् भवेत्, धैर्ययुक्तो भवेत्, कीदृशीभिः शय्याभिः? उच्चाश्च अवचाश्चः उच्चावचास्ताभिरुच्चावचाभिः, उच्चाःशीतादिरक्षणगुणैर्युक्ताः, अवचास्तद्विपरीताः,

तादृशीभिः, शय्यते यासु ताः शय्या उपाश्रया उच्यंते. तत्रोपाश्रयेषु स्थितः साधुरतिवेलां साधुर्मर्यादां न विहन्यात्, हर्षविषादाभ्यां साधुर्मर्यादायां तिष्ठेत्, सद्गुणयुक्तां शय्यां लब्ध्वा हर्षभाग्न भवेत्, गुणैर्हीनां शय्यां लब्ध्वा विषादभाग् न स्यात. पापदृष्टिराचारहीनः, उच्चावचाभिः शय्याभिरतिवेलां साधुर्मर्यादां विहन्यात्, हर्षविषादयुक्तः स्यात्. ॥ २२ ॥

अर्थः—तपस्वी भिक्षु, उच्च एटले जेमां शीत वगेरेथी रक्षण करे तेवा ओढवा पाथरवानां साधन होय तेवी अने अवच एटले तेवां साधन रहित शय्या होय तेनाथी स्थामवान् बने; अर्थात् सद्गुण युक्त शय्या पामीने हर्ष न पामे तेम गुणहीन शय्याना लाभथी विषाद खेद न पामे एवा प्रकारना धैर्यने धारण करे. अर्थात् गमे तेवी शय्या मळतां साधु मर्यादाने न हणे. पोतानी मर्यादामांज स्थित रहे, केमके पापदृष्टि पुरुष विहत थाय छे. ॥ २२ ॥

साधुः प्रतिरिक्तं पशुपंडकस्त्र्यादिरहितमुपाश्रयं लब्ध्वा तत्रैवमध्यासीतैव विचारयेत्, कीदृशमुपाश्रयं ? कल्याणं शुभं सुखदायकं, अथवा पापकं दुःखदायकमेतादृशमुपाश्रयं प्राप्यैवं चिंतयेत्, एवमिति किं ? मे ममानयैकरात्रिस्थितियोग्यया स्थित्या किं कार्यं ? एकरात्रं ममात्र निवासः करणीयः, किं करिष्यति कल्याणमुपाश्रयं प्राप्येति चिंतयेत्, पुण्यवंतो जना एतादृशेषु स्थानेषु तिष्ठंति, अन्ये पामरास्तृणमयमृत्तिकामयेषु नित्यं वसंति, मम त्वस्यां स्थितो न ममत्वं विधेयं, सुखदुःखं वा सहेत, जिनकल्पापेक्षयैकरात्रं, एकरात्रिर्यत्र तदेकरात्रं, उपाश्रयं

वसेत्, जिनकल्पो ह्येकरात्रमुपाश्रयं शुभं वाऽशुभं वा सेवेत. स्थविरकल्पो मुनिः कतिपयाहोरात्रिवासीभवेत्, स्थविरकल्पः पञ्चारात्रं नगरे वसति. ॥ २३ ॥

प्रतिरिक्त=पशु पंडक स्त्री आदिथी शून्य उपाश्रय मळे त्यां स्थित थइ एम विचार करे के –उपाश्रय भले कल्याण=सुखजनक हो अथवा पापक=दुःखदायक हो तथापि मारे रात्री निवास करवानो छे एम तेना हृदयनो आशय होय छे पुण्यवान् जनो आवाज स्थानमां रहे छे. अने पामरजन घासना तथा मृत्तिकादिकना स्थान बनवावी नित्य निवास करे छे. मारे तो आ स्थितिमां कंइ ममत्व छे नहिं सुख दुःख सहन करी अहीं जिनकल्पनी अपेक्षाये एक रात्र उपाश्रय वास करवानो छे. मारे तो आ स्थितिमां अशुभ उपश्रय एक रात्रज सेवे छे अने स्थविरकल्प मुनि केटलाक रात्री दिवस नगरमां निवास करे ते पण पांच रात्रीथी अधिक नगर निवास न करे २३

अत्र यज्ञदत्तपुत्रयोः कथा यथा–कौशांब्यांयज्ञदत्तद्विजपुत्रौ सोमदत्तसोमदेवनामानौ प्रव्रजितौ गीतार्थौ जातौ अन्यदा तत्पितरावुज्जयिन्यां गतौ, तावपि साधू विहरंतौ तत्र गतौ. तत्र तदादेरीशत्या स्वगृहे क्रियमाणं विविधौषधिमिश्रं मद्यापरपर्यायं विकटं ( उष्णजालं ) स्वजनैर्दत्तं.

—आ विषयमां यज्ञदत्तना बे पुत्रोनी कथा दृष्टांत रूपे कहे छे.—

कौशांबी नगरीमां यज्ञदत्त ब्राह्मणना सोमदत्त तथा सोमदेव एवा नामना बे पुत्र हता. ते बेय प्रव्रज्या ग्रहण करी गीतार्थ थया.

तेना माता पिता एक समये उज्जयिनीमां गया त्यां विहार करता आ बे पुत्र पण जइ चड्या. अहीं तेना देशनी रीत प्रमाणे विविध प्रकारना औषधो नाखीने तेने घरे सुरा नामनुं विकट ऊनुं पाणी करातुं हतुं ते स्वजनोए आ बेने आप्युं.

---

तौ तत्स्वरूपमजानंतौ जलविशेषबुध्या पीतवंतौ, परिणते च तस्मिन् ज्ञातमद्यस्वरूपौ तौ कृतपश्चात्तापौ तद्वैराग्यादेवानशनं पादपोपगमनामकं नदीतटस्थकाष्ठोपरि प्रपन्नौ. ततोऽकालवृष्ट्या नदीपूरेण प्लावितौ समुद्रांतः प्रविष्टौ, तत्र जलचरोपसर्गं विषह्यदिवं गतौ. इमौ हि नीरपूरागमेऽपि शय्यातो न पृथग्भूतौ. एवं शय्यापरीषहः.

---

अने तेओए स्वरूप जाण्या विना आ कोइ विशेष प्रकारनुं जळ छे एवी बुद्धिथी पीधुं पण ज्यारे परिणामे मद जणाणो त्यारे ए जळमां कंइ मद्य अवश्य हतुं एवुं भान थतां पश्चात्ताप करी वैराग्य उत्पन्न थवाथी बन्नेए अनशन–निराहार पादपोपगमन–( कोइ वृक्षतळे जवुं ) नामनुं व्रत लइ एक नदीतटे पडेला काष्ठ उपर जइ बेठा, आ वरुतेअकाळ वृष्टि थवाथी नदीना पूरमां काष्ठ साथे बन्ने जणा तणाणा अने समुद्रमां जइ पड्या. त्यां जळचर जंतुओना उपद्रव सहन करी स्वर्गे गया. आ बे जणा पाणीनुं पूर आव्युं तो पण आसनथी=शय्याथी पृथक् न थया अने शय्या परीषह सहन करी सिद्धि पाम्या.

---

अथ शय्यास्थितस्य तत्रोपद्रवे जाते सति रागद्वेषरहितस्य साधोर्यदा कश्चिच्छय्यातरो वा शय्यातरादन्यो वा वचनैराक्रोशेदिति हेतोराक्रोशपरीषहोऽपि सोढव्यः, अतस्तत्परीषहमाह—

हवे शय्या स्थित साधुने शय्यामां उपद्रव आवे त्यारे रागद्वेष रहित साधुने कोइ शय्यातर अथवा तेथी अन्य कोइ वचनोवडे तिरस्कारे=अवाच्य शब्दो कहे त्यारे ते आक्रोश परीषह पण सहन करवो एतदर्थ आक्रोश परीषहनुं निरूपण करे छे.—

अक्कोसिज्ज परो भिक्खुं । न तेसिं पडिसंजले ॥ सरिसो होइ बालाणं । तम्हा भिक्खू न संजले ॥२४॥
सुच्चाणं फरुसा भासा । दारुणा गामकंटया ॥ तुसीणीओ उवेहिज्जा । न ताओ मणसी करे ॥ २५ ॥

मूळगाथार्थः—कदाच (परो) बीजो कोइ माणस (भिक्खुं) साधुने (अक्कोसिज्ज) आक्रोश करे तो (तेसिं) तेना पर (न पडिसंजले) कोप करे नहिं (बालाणं) बाळकनी (सरिसो) सदृश=तुल्य (होई) थाय छे (तम्हा) ते कारण माटे (भिक्खू) साधुए (न संजले) कोप न करवो. ॥ २४ ॥

(दारुण) दारुण तथा (गामकंटया) कर्णने अप्रिय करनारी एवी (फरुसा) कठोर (भासा) भाषा (सोच्चाणं) सांभळीने साधुए (तुसिणीओ) मौन रही (उवेहिज्जा) ते कठोर भाषानी उपेक्षा करवी तथा (ताओ) ते कठोर भाषाने (मणसी) मनमां (न करे) न लावबी. ॥ २५ ॥

व्या०—परोऽन्यः कश्चिद्यदि भिक्षुं साधुमाक्रोशेत दुर्वचनैस्तर्जयेत् तदा तस्मै न प्रतिसंज्वलेत्, तस्योपरि क्रोधं न कुर्यादित्यर्थः, यदि तस्योपरि साधुरपि क्रोधं कुर्यात्तदा सोऽपि बालानां मूर्खाणां सदृशो भवेत्, तस्माद्भिक्षुर्न संज्वलेद्गालीं श्रुत्वा प्रतिगालीं न दद्यात्.

अर्थः—पर अन्य कोइ ज्यारे साधुने आक्रोशे एटले दुर्बचन (गाळो) वडे तरछोडे त्यारे ते गोळो देनार प्रत्ये ते भिक्षु प्रति

संज्वलन–एटले सामो वळी न उठे, तेना उपर क्रोध करे. जो साधु पण तेना उपर क्रोध करे तो ते बालक मूर्खना जेवोज मनाय, माटे भिक्षुए गाळ सांभळीने सामी गाळ देवी नहिं. २४

तदा किं कुर्यादित्याहद 'सुच्चा' साधुस्तूष्णीको मौनी सन्नुपेक्षेत, औदासीन्येन निष्टेत्, रागद्वेषरहितो भेवेत्, ता भाषा मनसि न कुर्यात्, किं कृत्वा? परुषाः कठोरा भाषाः श्रुत्वा, कीदृशीः भाषाः? दारुणाः, दारयंति संयमधैर्यं विदारयंतीति दारुणाः, पुनः कीदृशीः? ग्रामकंटकाः, ग्राम इंद्रियगणस्तस्य कंटका इव कंटका ग्रामकंटका दुःखोत्पादकाः. यदुक्तं—

त्यारे शुं करवुं ते कहे छे. पुरुष=कठोर, तथा दारुण=संयम धैर्यनुं विदारण करी नाखे तेवी=भने ग्रामकंटक=एटले इंद्रियगणने कांटानी पेठे दुःख आपनारी भाषा श्रवण करीने साधु तूष्णीक=मौनी थइने स्थिर रहे. रागद्वेष रहित बनी एवी भाषा मनमां न लेतां उपेक्षा करे. कह्युं छे के–

चांडालः किमयं द्विजातिरथवा शूद्रोऽथवा तापसः। किं वा तत्वनिवेशपेशलमतिर्योगीश्वरः कोऽपि वा॥ इत्यस्वल्पविकल्पजल्पमुखरैः संभाष्यमाणा जनै—नों रुष्टो न हि चैव हृष्टहृदयो योगीश्वरो गच्छति॥ १॥ पुनर्गालीं श्रुत्वेति चिंतयेत्—ददतु ददतु गालीर्गालिमंतो भवंतो। वयमपि तदभावाद्गालिदानेऽप्यशक्ताः॥ जगति विदितमेतद्दीयते विद्यमानं। ददतु शशविषाणं ये महात्यागिनोऽपि॥ १॥ इति विचार्य शमत्वेन तिष्टेत्.

( चाण्डालः० )–' आ ते कोइ चांडाल छे ? के शुं आ ब्राह्मण छे ? अथवा कोइ क्षुद्र छे ? के तापस=तपस्वी छे ? किंवा तत्त्वज्ञानमां प्रवेश करी शके एवी निपुण मतिवाळो आ ते कोइ योगीश्वर छे ? आम अनेक विकल्पना प्रलापथी वाचाळ लोको गमे तेम भाषण करे तो पण योगीश्वर हर्ष हृदये धरतो नथी तेम रोषे पण भरातो नथी. किंतु निर्विक्रिय चाल्यो जाय छे. वळी ते जन मुखेथी गाळी सांभळीने मनमां एम विचार करे–( ददतु० ) तमे गाळो देता रहो, केमके तमे गाळोवाळा छो अम पासे गाळो नथी एटले अमे गाळ देवा अशक्त छइए आ जगत्मां प्रसिद्ध वात छे के–जेनी पासे जे होय ते पोता पासेनी वस्तु दइ शके छे. न होय तेवुं पण जो कोइ दइ शकता होत तो महोटा त्यागी=दानी पुरुष शशलानुं शींगडुं पण दइ शकत. ए तो जेनी पासे जे होय ते ते दीये. आम विचार शमनो आश्रय करी रहे. ॥ २५ ॥

---

अत्रार्जुनमालाकारर्षिकथा यथा—अथ राजगृहे नगरेऽर्जुननामा मालिकोऽस्ति, तस्य प्रिया स्कंदश्रीनाम्नी वर्तते, स स्ववाटिकामार्गस्थं पुराद्बहिर्मुद्गरपाणियक्षं निरंतरं स्वगोत्रदेवत्वेनार्चति. अन्यदा वाटिकागतस्यार्जुनमालिकस्य समीपे सा भोज्यं गृहीत्वा वाटिकायां यांति यक्षभवनस्थैः षट्पुरुषैर्दृष्टा, भोगार्थं यक्षभवनांतः प्रवेशिता. तदानीमेव तत्र यक्षपूजार्थं मालिकः समायातः, तं बध्ध्वा षडपि पुरुषास्तस्या भोगे प्रवृत्ताः.

---

—आ विषयमां अर्जुनमालाकार अने ऋषिनी कथा कहे छे.—

राजगृह नगरमां अर्जुन नामनो माली हतो तेनी प्रिया स्त्री स्कंदश्री नामनी हती. ते पोतानी वाडीए जवाना मार्गमां नगरनी

बहार मुद्गरपाणि नामक यक्षनुं स्थान आवे, ते स्थाने ए मुद्गरपाणि यक्षने आ माली पोताना गोत्रदेवरूपे पूजतो. एक समये वाडीए अर्जुन माली हतो. तेने माटे तेनी स्त्री स्कंदश्री खावानुं ( भात ) लइ वाडीए जती हती त्यां ए यक्षभवनमां उभेला छ पुरुषोए दीठी एटले ए छ ए पुरुषोए ए स्त्रीने भोगार्थे यक्षभवनमां लइ गया. एज टाणे यक्षनी पूजा करवा पेलो माली आवी चडयो तेने आ छ जणाए बांधीने तेनी स्त्री साथे छए जणा भोगमां आसक्त थया.

स पश्यत्येवं च चिंतयति मयैष यक्षो मुधैवार्चितः, यदेतस्य पुर इत्थं पराभूयते. ततो यक्षस्तच्छरीरमनुप्रविश्य तान् षडपि पुरुषान् स्त्रीसप्तमान् मारयतिस्म. एवं प्रत्यहं मारयति. ततो लोकोऽपि तस्मिन् मार्गे राजगृहपुरात्तावन्न निर्गच्छति यावत्स मारिता न स्युः अन्या श्रीवीरस्तत्र समवसृतः, न कोऽपि तद्भयेन वंदनार्थं गच्छति.

ते जोइने मालीना मनमां थयुं के आ यक्षनुं पूजन तद्दन व्यर्थ छे. जेना आगळ आम स्त्रीनो पराभव थाय आ वचन सांभळी यक्षने चीड चडी तेथी यक्षे मालीना शरीरमां प्रवेश करी ए छए जणाने तथा स्त्रीने मारी नाख्या. यक्षने छंद लाग्यो तेथी रोज सात माणस मारवा मांड्यां आ उपरथी लोकमां त्रास पेठो ते ज्यां सुधी सात न मराय त्यांसुधी राजगृह नगरमांथी ते मार्गे कोइ न नीकळतुं. एक समये श्रीवीरे त्यां समवसरण कर्युं, पेला यक्षना भयथी कोइ पण वंदन करवा न आवे.

सुदर्शनश्रेष्ठी यद्भवति तद्भवतु, मया त्ववश्यं श्रीवीरस्तत्र गत्वा वंदनीय एवेति विचिंत्य तन्मार्गे चलितः,

तं दृष्ट्वा मालिकशरीरप्रविष्टो मुद्गरपाणिर्यक्षो धावितः. ततः सुदर्शनश्रेष्ठिनार्हत्सिद्धसाधुशुद्धधर्मशरणं प्रपन्नं, सागारिकमनशनमपि गृहीतं, कायोत्सर्गेण स्थितं, ततो धर्मप्रभावात्स यक्षस्तमाक्रमितुं न शक्नोति.

एक सुदर्शन नामना शेठ 'जे थवानुं हशे ते थशे. मारे तो त्यां जइने श्रीवीरने वंदन करवुंज' आम विचारीने ते मार्गे चाल्यो; तेने जोतांज पेला मालीना शरीरमां प्रविष्ट थएलो यक्ष तेनी पाछळ दोड्यो. आ टाणे सुदर्शन शेठीयाए अर्हत् सिद्ध साधुनुं शुद्ध शरण लइ सागारिक अनशन ग्रहण करी कायोत्सर्ग धारी स्थित थयो. ते वखते धर्मना प्रभावथी ते यक्ष ए सुदर्शन शेठनुं आक्रमण करी शक्यो नहिं.

पश्चाद्यक्षो मालिकशरीरं मुक्त्वा गतः स्वस्थीभूतो मालिकः श्रेष्ठीमुखाद्वीरागमनं श्रुत्वा श्रेष्ठिना सह वंदनार्थं गतः, वीरवचसा प्रतिबुद्धोऽसौ दीक्षां गृहीतवान्, राजगृहनगरमध्य एव गृहे गृहे भिक्षार्थं भ्रमति, लोकास्तु स्वजनमारकोऽयमित्याक्रोशान् ददति, स मनोवचनकायशुध्या तानाक्रोशान् विषह्योत्पन्नकेवलज्ञानः शिवमगात्.

एवमन्यैरप्याक्रोशपरीषहः सोढव्यः. । अथ कश्चिदाक्रोशको दुर्वचनवादी साधोर्वधमपि कुर्यात्, तदा तमपि सहेत. अतस्तत्परीषहमाह—

एटले ए यक्ष मालीनुं शरीर मूकी दइ चालतो थयो. पेलो माली पण यक्ष वेश निवृत्त थवाथी स्वस्थ थयो. त्यारे शेठना मुखथी श्रीवीरनुं आगमन सांभळी शेठनी साथेज वंदन करवा गयो. त्यां श्रीवीरना वचनथी प्रतिबुद्ध थइ दीक्षा ग्रहण करी अने

राजगृह नगरमांज घरे घरे भिक्षार्थ भ्रमण करे छे. लोको तो ' आ पोताना स्वजनने मारी नाखनारो छे ' एम तेनी निंदा करे अने तेने गाळो देवा मंड्या तथापि ते साधु थएलो माळी मन वचन तथा कायाथी शुद्ध रही ते गाळोने सहन करतां केवळज्ञान उत्पन्न थवाथी कल्याण पाम्यो. एम अन्य साधु पुरुषोए पण आक्रोश परीषह सहन करवो.

कदाच कोइ आक्रोशक=दुर्वचनवादी=साधुनो वध पण करे तो ते पण सहेवुं एतदर्थ वधपरीषह दर्शावे छे.

---

**हओ न संजले भिक्खू । मणं पि न पओसए ॥ तितिक्खं परमं नच्चा । भिक्खू धम्मं विचिंतए ॥२६॥**
**समणं संजयं दंतं । हणिज्जा कोइ कत्थई ॥ नत्थि जीवस्स नसोत्ति । एयं पेहिज्ज संजए ॥ २७ ॥**

मूळगाथार्थः—(भिक्खू ) साधु (हओ) कोइए मार्यो होय तो पण (न संजले,कोप युक्त न थाय तथा (मणं पि) मनने पण (न पओसए) द्वेषयुक्त करे नहिं (तितिक्खं ) तितिक्षा एटले क्षमाने (परमं ) धर्मसाधनमां उत्कृष्टी (चेष्टा) छे एम (नच्चा) जाणीने (भिक्खू धम्मं) क्षांति विगेरे साधुना धर्मनुं (विचिंतिए) चिंत्वन करे. २६ (कोवि) कोइ माणस (कत्थइ) कोइ गामने विषे (संजयं) संयत=हिंसादिकथी निवृत्त तथा (दंतं) इंद्रिय अने नोइंद्रियमन ने दमन करनारा (समणं) तपस्वी साधुने (हणेज्जा) ताडन करे, तेथी साधु विचारे के-ताड नथी (जीवस्स) मारा जीवनो (नसोत्ति) गाश (नत्थि) थवानो (एवं) ए प्रमाणे (संजए) साधु (पेहिज्जा) विचार करे.

---

व्या०—भिक्षुः साधुर्हतो यष्ट्यादिभिस्ताडितो न संज्ज्वलेन्न क्रोधाध्मातः स्यात्, मनोऽपि न प्रद्वेषयेत्, चित्तं सद्वेष न कुर्यादित्यर्थः. किं कृत्वा ? तितिक्षां क्षमां परमामुत्कृष्टां ज्ञात्वा दशविधसाधुधर्मे क्षांतिमुत्कृष्टां विचार्य भिक्षुर्धर्मं विचिंतयेत्. मम धर्म एव रक्षणीय इति विचिंतयेदित्यर्थः. ॥ २६ ॥

अर्थः—भिक्षु=साधु, लाकडी विगेरेथी ताडित थाय तो पण न जळे अर्थात् कोइ तेने हणे–मारे–तो पण तेने सामे क्रोधाक्रांत न थाय; तेम मनने पण सद्वेष न करे, किंतु तितिक्षा=सहनशीलताने परम उत्कृष्ट जाणीने अर्थात् दशविध साधु धर्ममां क्षांतिने सर्वोत्कृष्ट विचारीने धर्मनुं चिंतन करे, एटले–'मारे तो धर्मनी रक्षा करवानी छे' एम विचारे. २६

---

कश्चिद् दुष्टः कुत्रचिदनार्यदेशे श्रमणं साधुं हन्यात्, प्राणापहारमपि कुर्यात्तदा संयतः साधुरेवं संप्रेक्षेत विचारयेत्, एवमिति किं ? जीवस्या नाशो नस्ति. शरीस्य नाशो विद्यते, न च शरीरनाशे जीवनाशः, कीदृशं साधुं ? संयतं जितेंद्रियं, पुनः कीदृशं ? दांतं क्रोधादिरहितं, साधुना मनस्येवं चिंतनीयं कदाचिदहमस्मिन् शरीरनाशावसरे क्रोधं करिष्यामि तदा मम धर्मरूपजीवितव्यनाशो भविष्यति, न चास्मिन्ननित्यदेहे नष्टे ममात्मनो धर्मस्य च नाशो भावीति.

---

कोइ दुष्ट कोइ अनार्य देशमां श्रमण= साधुने हणे, अर्थात् प्राणापहार पण कदी करे त्यारे संययमवान् साधु एम विचारे के–'जीवनो नाश थतो नथी अने शरीरनो नाश तो थवानोज छे अने कंइ शरीर नाशथी जीव नाश थशे नहिं आम धारीने संयत= जितेंद्रिय तथा दांत=क्रोधादि रहित साधु मनमां पण एम भावन करे के–कदाच हुं आ शरीरना नाश अवसरे क्रोध करीश तो मारा धर्मरूप जीवितव्यनो नाश थशे अने आ अनित्य देह नष्ट थवाथी मारा आत्मानो के धर्मनो कंइ नाश थवानो नथी.

---

यदुक्तं—दोषो मेऽस्तीति युक्तं शपति शपति वा तं विनाज्ञः परोक्षे। दृष्टस्याः साक्षान्नं साक्षादिति शपति न

मां ताडयेत्ताडयेद्वा ॥ नासून् मुष्णाति तान् वा हरति सुगतिदं नैष धर्मं ममाहो । इत्थं यः कोऽपिहेतौ सति विशदयति स्याद्धि तस्येष्टसिद्धिः ॥ १ ॥

---

कहुं छे के-( दोषो० ) मारामां कंइ दोषो हशे त्यारे मने ते गाळ दीयेछे. अथवा दोष विना पण ते अज्ञ परोक्षे निंदा करेछे. नजर सामे नथी करतो. कदाच साक्षात् आवीने अवाच्य शब्दो कहे तो पण मने मारतो नथी. कदी आवीने ताडन-मार मारे तो पण कंइ मारा प्राण हरतो नथी अने कदी प्राण पण हरे तथापि मने सद्गति देनार धर्मने नथी हरतो आवीरीते जे साधु हेतुनी स्पष्टता विचारे तेनी इष्टसिद्धि थाय छे.

---

अत्र स्कंदकशिष्याणां कथा यथा—श्रावस्त्यां जितशत्रुनृपः, धारिणी प्रिया, तयोः पुत्रः स्कंदकः, पुरंदरयशा पुत्री कुंभकारकटके पुरे दंडकिनृपस्य दत्ता. तस्य पुरोहितः पालको मिथ्यादृक्. अन्यदा श्रावस्त्यां मुनिसुव्रतस्वामी समवसृतः, तस्य देशनां श्रुत्वा स्कंदकः श्रावको जातः एकदा पालकपुरोहितो दूतत्वेन श्रावस्त्यां प्राप्तः, राजसभायां जैनसाधुनामवर्णवादं वदन् स्कंदकेन निरुत्तरीकृत्य निर्घाटितः स स्कंदककुमारस्य छिद्राणि पश्यति.

---

—आ विषयमां स्कंदक शिष्योनी कथा कहे छे.—

श्रावस्ती नगरीमां जितशत्र राजा हतो तेनी धारिणी नामे प्रिया स्त्री हती. तेओने एक स्कंदक नामे पुत्र तथा एक पुरंदरयशा

नामे पुत्री हती, आ पुत्री कुंभकारकटक नामना शहेरमां दंडकि नामना राजाने आपी हती तेनो पुरोहित पालक मिथ्यादृष्टि हतो. एक समये श्रावस्तीमां मुनिसुव्रतस्वामीए समवसरण कर्युं. त्यारे तेनी देशना सांभळी स्कंदक श्रावक थयो. एक वखते पालक पुरोहित श्रावस्तीमां दूत बनीने आव्यो राजसभामां जैन साधुओने माटे अवाच्य वातो बोलतो हतो. तेने स्कंदके निरूत्तर करी काढी मूक्यो त्यारथी ते स्कंदक कुमारनां छिद्र जोवा लाग्यो.

अन्यदा स्कंदककुमारः श्री मुनिसुव्रतस्वामिपार्श्वे पञ्चशतकुमारैः सह प्रव्रजितो गीतार्थो जातः, स्वामिना ते कुमारशिष्यास्तस्यैव दत्ता. अन्यदा स स्वामिनं पृच्छति भगवन्! भगिनीं वंदापनार्थं गच्छामि? स्वामिना भणितं तत्र मरणांतिकोपसर्गोऽस्ति, स्कंदकेनोक्तं भगवन्! वयमाराधका विराधकाः, वा? स्वामिना भणितं त्वां मुक्त्वा सर्वेऽप्याराधकाः, स्वामिनैवमुक्तेऽपि भवितव्यतावशेन पञ्चशतशिष्यपरिवृतः स कुंभकारकटकपुरे गतः.

व्या०-नूनमिति संभावनायां परलोकोनास्ति, परलोके गतः कोऽपि नात्रागत्य वदति, तस्मात्प्रत्यक्षस्याभावन्नास्ति परलोकः, वाऽथवा तपस्विनोऽपि साधोरपि काचिद्, ऋद्धिरामर्षौषधिवपुषौषधिखेलौषधिप्रमुखा काचिन्नास्ति न दृश्यते, अथवा किं बहूना ? अहं वंचितोऽस्मि, ऋषिभिष्टगितोऽस्मीति भक्षुर्न चिंतयेन्न निचारयेत. ते जिनाः केवलिन एवमाहुः कथयतिस्म तन्मृषा तदसत्यं, एवं तत् किं ? जनास्तीर्थकराः केवलिनो वाऽभूवन्, पुनर्जिनाः संति, सांप्रतं वर्तमानकाले महाविदेहक्षेत्रादौ संति, अथवाऽग्रे भविष्यंतीति यदूचुस्तदसत्यं. प्रत्यक्षमदृश्यमानत्वात्. इति विचारे क्रियमाणेऽसम्यक्त्वसंगः स्यात्, तस्मादिति न विचारणीयं, सम्यक्त्वपरीषहः सोढव्यः.

---

अर्थः—'नूनं' आ पद संभावना अर्थमां छे खरेखर परलोकमां कंइ नथी. अर्थात् परलोक गयेला कोइ आवीने कहेता नथी; एटले प्रत्यक्ष न देखावाथी परलोक छेज नहिं, तपस्विनी पण कंइ ऋद्धि=आमर्षौषधि वपुषौषधि खेलौषधि इत्यादिरूपा नथी—देखाती नथी. अथवा बीजुं शुं? हुंज वंचित छुं. ऋषिओए मने ठग्यो छे—आम भिक्षु न विचारे. जिन-तीर्थंकरो केवली थइ गया, तेम वर्तमानमां पण जिन तीर्थंकरो महाविदेहक्षेत्रादिकने विषये विद्यमान छे अने आगळ उपर पण जिन-तीर्थंकरो थवाना छे-एम ते केवली जिनो कही गया छे ते असत्य छे, कारण के प्रत्यक्ष देखाता नथी-आवा विचार करवाथी मनमां असम्यक्त्वसंग=संशयादि थाय माटे भिक्षुए एवा विचार के चिंतन न करवुं. समयक्त्व परीषह सहन करवो.

---

अत्रार्याषाढसूरिकथा—वत्साभूम्यामाषाढभूतिसूरयस्तत्र गच्छे यो यः कालं करोति तं तं निर्जरयामासुः,

अंत्यसमये तेषामेवं कथयंति युष्माभिः स्वर्गे सुरीभूय मम दर्शनं देयं, ते चे स्वर्गे गच्छंति, परमाचार्याणां दर्शनं न ददति. तथा च सूरीणां परलोकशंका जायते. एकदैको विनेयः प्रकामं स्वभक्तः समाधिमरणसमये सूरिभिरेवमुक्तस्त्वया स्वर्गे देवीभूयावश्यं मम दर्शनं देयं, न प्रमाद्यं, सोऽपि मृत्वा देवो जातः, परं विचित्ररचनानाट्यादिदर्शनेन व्यग्रत्वान्नात्रायातः.

— आ विषयमां आर्य आषाढसूरिनी कथा कहे छे —

वत्साभूमिमां आषाढभूतिसूरि हता ते गच्छमां जे जे काळ करे तेने निर्जरा करावे अने अंतसमये तेने कहे के–तमारे स्वर्गमां सूरि थइने मने दर्शन देवुं. ए मरनारा स्वर्गे जाय परंतु आचार्यने दर्शन देवा न आवे ते उपरथी आषाढभूतिना मनमां परलोक शंका थइ. एक समये ए सूरिनो एक विनय=शिष्य अत्यंत भक्त मरवा पड्यो. समाधिमरण समये तेने सूरिए कह्युं के–तारे स्वर्गे जइ देव थया पछी मने अवश्य दर्शन देवुं, तेमां प्रमाद न करवो. पेला शिष्ये कबुल कर्युं. ते मरीने देव थयो पण विचित्ररचनावाळां नाट्यादि जोवामां व्यग्र थतां सूरिने दर्शन देवा न आव्यो.

तावता सूरिभिरेवं चिंतितं नास्त्येव परलोकस्ततः कोऽपि नात्रागच्छति. यदि परलोकः स्यात्तदा मच्छिष्याः कृतप्रतिज्ञा अपि कथं न दर्शनं दद्युः? ततो मयाद्ययावद् व्रतानि, पालितानि, तपांसि तप्तानि कष्टानि कृतानि, सर्वाण्यप्यनुष्ठानानि मुधा जातानि, मुधा मया भोगास्त्यक्ताः, वंचितोऽहमिति मिथ्यात्वं प्रतिपन्नाः, गच्छं मुक्त्वैकाकिन एव लिंगमात्रधरा निर्गताः.

त्यारे सूरिना मनमां एम विचार आव्यो के-परलोक जेवुं कंइ छेज नहिं तेथीज कोइ अत्रे पाछो आवतो नथी. जो परलोक होयतो मारा शिष्य प्रतिज्ञा करीने जाय ते पण मने पाछा दर्शन केम न दीये? में आज दिवस सुधी घणाय व्रत पाल्यां, अनेक तप तप्यां, बहु कष्ट वेठ्यां, बधां अनुष्ठान कर्यां ए तमाम व्यर्थ थयां. में सकल भोगनो त्याग पण व्यर्थ कर्यो; नाहक हुं वंचित रह्यो; आम मिथ्यात्व प्रतिपत्तिवाळा बनी गया. गच्छनो त्याग करी एकला मात्र साधु=लिंगधारी थइ निकळी गया.

---

अत्रांतरे तेन भक्तशिष्येण देवीभूतेन कियद्दिनानि यावन्नाट्यादि विलोक्य गुरुप्रेम्णाऽत्रायतं मिथ्यात्वं गता गुरवो दृष्टाः, तत्प्रतिबोधार्थं कस्यजिद्ग्रामस्य सीम्नि नाट्यं विचक्रे, तत्राचार्याः षण्मासान् यावन्नाट्यं पश्यंतः क्षुधादिकं नानुभूतवंतः, नाट्यं देवेन विसृष्टं, आचार्या अग्रतश्चलिताः. ततस्तेनैव सुरेण तेषामाचार्याणां संयम-परीक्षार्थं षट्कायनामानः षट्कायनामानः षट् दारकाः सर्वालंकारविभूषितांगा विकुर्विताः.

---

एटलामां ए आषाढभूति सूरिनो जे शिष्य पाछां दर्शन देवानी प्रतिज्ञा करी देव थयो हतो ते देवभादमां केटलाक दिवस नाट्यादि जोया पछी गुरुना प्रतिप्रेमनुं स्मरण थतां अहीं आव्यो त्यां गुरुने मिथ्यात्व पामेला दीठा. ते गुरुने प्रतिबोध देवा माटे कोइ गामनी सीममां तेणे नाट्य प्रयोग करवा मांड्या. आचार्य छ महीना सुधी नाट्य जोता रह्या तेमां भूख तरस वगेरेनुं पण भान न रह्युं. देव थयेला शिष्ये ज्यारे नाट्य बंध कर्युं त्यारे आचार्य आगल चाल्या; त्यारे ते देव थयेला शिष्ये ते आचार्यना संयमनी परीक्षा करवा षट्काय नामना छ छोकरा सर्व अलंकारथी शणगारेला उत्पन्न कर्या.

प्रथमं पृथ्वीकायिकः कुमारस्तेषामाचार्याणां दृष्टौ पतितः, आचार्या आहुः, भो बाल! भूषणानि ममार्पय? स नार्पयति. तदनु सूरिभिरसौ गले गृहीतः ततश्च भयभ्रांतो बालः प्राह प्रभोऽहं पृथिवीकायिकः कुमारः अस्यां सैंद्राटव्यां त्वां शरणं श्रितः, भवादृशानामेवं कर्तुं न युक्तं, हे स्वामिन् मदुक्तैका कथा श्रूयतां तथाहि—

पहेलवेलो पृथ्विकायिक कुमार ते आचार्यनी दृष्टिये पडयो. आचार्य बोल्या के—अरे बाळक! तारां भूषण मने आपीदे. ते बाळके ज्यारे भूषण न आप्यां त्यारे सूरिए ते बाळकने गळे पकडयो तेथी भयभ्रांत थइने ते बाळक बोल्यो के—'हे प्रभो!' हुं पृथ्वीकायिक कुमार छुं, आ सैंद्र अटवीमां तमारा शरणने आश्रये छुं तो आप जेवाने आम करवुं योग्य नथी. हे स्वामिन् हुं एक कथा कहुं ते सांभळो.—

एकः कुलालः खानो मृदं खजन् मृदाक्रांतः एवं भणति—जेण भिक्खं बलिं देमि। जेण पोसेमि जाइओ॥ सा मे मही अक्कमइ। जायं सरणओ भयं॥ १॥ एतन्न्यायेन शरणागतस्यापि कथमेवं पराभवं करोषि? सूरिभिरुक्तमतिपंडितोऽसि बालेत्युक्त्वा तदंगाभरणानि गृहीतानि, पात्रेक्षिप्तानि, गतः पृथिवीकायिकः. स्तोकांतरे गच्छद्भिराचार्यैर्द्वितीयोऽप्कायिकनामा बालको दृष्टः, सोऽपि तथैवोवाच, तत्कथिता कथा चेयं—

एक कुंभार माटी खाणमां माटी खोदतां खोडतां भड धसी पडतां माटीमां दबाणो त्यारे बोल्यो-(जेणे०) जेणे भिक्षा=बलि अर्थात् आज पर्यंत गुजारो दीधो, जेणे मने जन्मथी पोष्यो तेज माटी मने आक्रमे छे=दाटे छे आतो शरणमांथी भय जन्म्युं आ रीते तमारा शरणागतरूप मने केम आम पराभव करो छो. सूरिए कह्युं-'तुं अपंडित=मूर्ख=छो हे बाल!' एटलुं कहीने तेनां आभरण लइ लीधां.

अने पोताना पात्रापां नाख्यां. पृथ्वीकायिक गयो ते पछी थोडीवारमां आचार्यने आगळ चालतां बीजो 'अप्कायिक' नामनो बालक दृष्टिए पड्यो. तेणे पण प्रथमना बाळकनी पेठेज वचन कह्यां अने कथा कही.

---

एकः पाटलनामा तालचरः प्रकामं वाग्मी, सोऽन्यदा गंगाश्रोतसि प्रविष्टः, तेन च ह्रियमाणोऽसौ तटस्थजनेनाभाषि हे पाटल! प्राज्ञ! किंचित्सूक्तं पठ? सोऽवादीत्—जेण रोहंति बीआणि। जेण जीवंति कासवा॥ तस्स मज्झे मरिस्सामि। जायं सरणओ भयं॥ १॥ एवमप्कायिककुमारेण कथोक्ता, तथापि तस्याभरणानि तेनाचार्येणातिपंडितोऽसि हे कुमारत्युक्त्वा गृहीतानि, सोऽपि तथैव गतः अग्रेऽग्निकायिकः कुमारस्तस्यापि तथैवोक्तिप्रत्युक्ती, तत्कथिता कथा चैषा—

---

एक पाटल नामनो तालचर अत्यंत वाचाल हतो ते एक समये गंगाना प्रवाहमां पेठो ते प्रवाहमां तणाणो त्यारे तीरे उभेला जणे कह्युं के—' हे पाटल! प्राज्ञ? कंइक सूक्तनो पाठ करो. त्यारे ते बोल्यो (जेण०) जेनाथी बधां बीज उगे छे अने जेना वडे बधा प्राणिओ जीवे छे तेना मध्यमां मरीश. एतो शरणमांथी भय उत्पन्न थयुं कहेवाय. आम ए अप्कायिक कुमारे कथा कही तो पण आचार्ये ' तुं तो अति पंडित छो, कुमार! एम कहीने बधां आभरण उतारी लइ पात्रांमां नाख्यां. ते अप्कुमार चालतो थयो, त्यां आव्यो अग्निकुमार बालक तेणे पण वचम प्रतिवचन थया पछी कथा कही के—

---

एकस्य तापस्याग्निनोटजो दग्धः, स वक्ति—जमहं दिवा य राओ य। तप्पेमि महुसप्पिणा॥ तेण मे

उडओ दड्ढो । जायं सरणओ भयं ॥१॥ अस्मिन्नेवार्थे द्वितीया कथा—कश्चित्पथिकः पथि व्याघ्रभीत्याग्निशरणं श्रितः, तेनैव तस्यांगं दग्धं, स प्राह—मए वग्घस्स भीएणं । पावओ सरणीकओ ॥ तेणं दड्ढं मम अंगं । जायं सरणओ भयं ॥२॥ एवं कथाद्वयं कथयतस्तस्य कुमारस्य तेनाचार्येण तथैवोक्त्वाभरणानि गृहीतानि, अग्रेवायुकुमारो मिलितस्तस्य तथैवोक्तिः, तत्कथिता कथा चेयं—

---

एक तपस्वीनी झुंपडी अग्नियें बाळी त्यारे तेणे कह्युं के—जेने में रात्रे तथा दिवसे मध तथा घीवडे तृप्तकर्यो तेज अग्निए मारुं उटज=झुंपडुं बाळ्युं. आतो शरणमांथी भय उत्पन्न थयुं. वळी आ विषयमां बीजी पण कथा कही के—कोइ एक पथिक=वटेमार्गु वाघनी ब्हीकथी अग्निनो भडको करी तेने शरणे बेठो त्यां ते अग्निएज तेनुं अंग दझाडयुं, त्यारे ते बोल्यो के—वाघथी ब्हीने में पावकने शरण कर्यो तेणेज मारुं अंग बाळ्युं. ए शरणमांथी भय उत्पन्न थयुं. आम बे कथा कही ते सांभळतां छतां पण आचार्ये तेने पहेलांनी पेठे मूर्ख वगेरे वचनो संभळावी तेनां तमाम आभरणो उतारी लइ पात्रांमां नाख्यां. आगळ चालतां वायुकुमार मल्यो तेणे पण पूर्वना कुमारना जेवांज वचनो संभळावी कथा कही के—

---

एको घननिचितशरीरो वायुजातिः, स चान्यदा वायुभग्नांगो दंडधारी मार्गे गच्छन् केनाप्युक्तो हंहा दृढांग ! त्वं कथमीदृग्जातः ? स आह—जिट्ठासाढेसु मासेसु । जो सुहो होइ मारुओ ॥ तेण मे भज्जए अंगं । जायं सरणओ भयं ॥ १ ॥ एवं कथां कथयतोऽपि तस्य कुमारस्याभरणानि तेनाचार्येण गृहीतानि.

कोइ एक दृढपुष्ट अंगवाळो वायु जाति हतो ते एक समये वायुथी जेनुं अंग भग्न थयुं छे तेवो हाथमां लाकडी झाली मार्गमां जतो हतो तेने कोइए कह्युं—के मजबूत अंगवाळा! तुं आम केम थइ गयो? ते बोल्यो—ज्येष्ठ आषाढ मासमां जे वायु सुखकर होय छे तेणे मारुं अंग भांगी नाख्युं, ने जेनुं शरण लीधुं तेनाथीज भय उत्पन्न थयुं. ॥१॥

अग्रे च वनस्पतिकायिकः कुमारः, सोऽपि तथैवाख्यत्, तदुक्ता कथा चेयं-एकस्मिन् वृक्षे केषांचित्पक्षिणामावासोऽस्ति, तत्र बहूनि तेषामपत्यानि जातानि. अन्यदा वृक्षमूलादुत्थिता वल्ली समंताद्वेष्टयंती वृक्षशिखरमारूढा. एकदा तामारुह्यसर्पस्तत्सीमां प्राप्तो नीडस्थान्यपत्यानि भक्षितवान्, मातृपितृपक्षिभिरुक्तं—

आगळ चालतां वनस्पतिकायिक कुमार मळ्यो. तेणे पण पूर्वना कुमार जेवांज वचनो संभळावी कथा कही के-एक वृक्षमां केटलांक पक्षिओनां रहेठांण हतां तेमां घणाय पक्षीओनां बच्चां जन्म्यां हतां. ए झाडनामूळमांथी एक वेल उठी ते झाडने चारे कोरथी बींटलाती चाली ते छेक ए झाडनी टोचे पहोंची. एक समये ए वेल उपर चडीने एक सर्पे टोचे पहोंची पक्षीओना माळाओमां पडेलां बच्चांनुं भक्षण कर्युं त्यारे ते बच्चांओनां मावतर पक्षियोए कह्युं के—

जाव वुच्छं सुहं वुच्छं । पायवे निरुवद्दवे ॥ मूलाओ उट्ठीआ वल्ली । जायं सरणओ भयं ॥ १ ॥ एवमुक्तेऽपि वनस्पतिकायिकस्याभरणानि तेनाचार्येण गृहीतानि. अथ त्रसकायिकः कुमारः कथामाह—

ज्यारे आ वृक्ष पाम्या त्यारे आ सुखरूप तथा उपद्रवरहित वृक्ष हतो. मूळमांथी वेल उठी अने शरणमांथी भय जाग्युं.

आम कहेतां छतां पण ए आचार्ये वनस्पतिकायिककुमारनां सघळां आभरण उतारी लइने पोताना पात्रांमां नाख्यां. त्यां वळी त्रसकायिककुमार मळ्यो तेणे पण बीजाओनी पेठे युक्ति प्रयुक्ति कर्या पछी कथा कही के—

एकस्मिन्नगरे परचक्रागमे पुरं प्रविशतश्चांडालानशौचभीत्या जनैर्निष्कास्यमानान् दृष्ट्वा मध्यस्थजनाः केचिदाहुः—अब्भितरिआ भीआ। पिल्लंती बाहिरें जणें ॥ दिसं भयहमायंगा। जायं सरणओ भयं ॥ १ ॥ त्रसकायिको द्वितीयां कथामाह—एकस्मिन्नगरे राजा स्वयं चौरः, पुरोहितो भांडीतदः, तयोरन्यायं दृष्ट्वा लोकाः परस्परं वदंति—जत्थ राया सयं चोरो। भंडिओ य पुरोहिओ ॥ दिसं भयह नागरगा। जायं सरणओ भयं ॥ १ ॥ अथाऽसौ तृतीयां कथामाह—

एक नगरमां परचक्रनो हल्लो थयो. अर्थात् पासेना राजाए चडाइ करी त्यारे पुरमां प्रवेश करतां चांडालोने आभडछटनी ब्हीकथी जनोए बहार काढवा मांड्या ते जोइने मध्यस्थ केटलाक जनो कहेवा लाग्या के—( अपभित० ) आभ्यंतर=अंदरना जनो ब्हीने बहारना जणने पीडे छे दिशाओ भयव्याप्त थतां आतो शरणमांथी भय उत्पन्न थयुं. वळी ए त्रसकायिके बीजी कथा कही के—एक नगरमां राजा स्वयं चोर हतो पुरोहित भांडीवह—एटले भांडा करनारो ते बेयनो अन्याय जोइ लोको कहेता के—( जत्थ० ) ज्यां राजा स्वयं चोर अने भाडीयो पुरोहित होय त्यां नागरिक लोकोने भय दीसे एतो शरणमांथी भय जाग्युं एम कहेवाय. वळी तेणे एक त्रीजी कथा पण कही.

एकस्मिन् ग्रामे एकस्य ब्राह्मणस्य पुत्री यौवनस्थातीवदर्शनीयास्ति, तस्या पितुर्भोगेच्छाभूत्, परं लज्जातः कस्याप्यग्रे न कथयति, दुर्बलो जातः, पत्न्या दुर्बलत्वकारणं पृष्टं, स स्वसुताभोगेच्छां प्राह, तया प्रोक्तं मा वीषीद तवेच्छामहं पूरयिष्यामीत्युक्त्वा मातैकांते पुत्रीं प्राह हे वत्सेऽस्माकं पूर्वं पुत्रीं यक्षा भुंजंति, पश्चाद्वरस्य दीयते. ततो यक्षः कृष्णचतुर्दश्यां त्वदावासे समायास्यति, त्वया तस्यापमानं न कार्यं, रात्रौ त्वयोद्योतो न कार्यः.

---

एक गाममां एक भ्रष्ट ब्राह्मणनी सूरूपा पुत्री हती तेमां ब्राह्मणनी वृत्ति मलिन थता मनमां शोषातो ते जोइने तेनी पत्नीए पूछ्युं त्यारे मनोगत कह्युं, तेणीए धणीने धारण दइ एकांतमां पुत्रीने कह्युं के—पुत्रीने प्रथम यक्ष उपयोजे छे पछी वरने देवाय छे. तारे आवासे चउदश दिने यक्ष आवशे तारे तेनुं अपमान न करवुं अने दीवो न राखवो.

---

* एवं मात्रोक्ते सा पुत्री रात्रिप्रस्तावे स्वगृहे सुप्ता, यक्षं साक्षात्पश्यामीती कौतुकेन दीपकः कृतः, परं शरावसंपुटे रक्षितस्तेन तद्गृहांतरुद्योतो न दृश्यते, रात्रौ तत्र पिता यक्षरूपः प्रविष्टः, तेनेयं भुक्ता. रतक्लांतश्च तत्रैव सुप्तो निद्राणश्च, अनया च कौतुकेन शरावसंपुटं दूरीकृत्य दीपोद्योते दृष्टो जनकः, ज्ञातं मातृकपटं, तया चिंतितं यद्भवति तद्भवतु, मयानेनैव सह विलासः कार्यः, इति चिंतयित्वा जागरितेन तेन समं पुनर्भोगान् भुक्त्वा सा सुप्ता सोऽपि सुप्तः द्वावपि निद्राणौ, प्रभातेऽपि न जाग्रतः, प्रतर्बाह्मणी तत्रागत्यतौ तथा सुप्तौ दृष्ट्वेमां मागधिकां पठति

* अइरुग्गएवि सूरिए। चेइए अ थूभगएवि वायसे॥ भित्तीइगएवि आयवे सहि। सुहिए हु जणे न बुज्झइ॥१॥

अस्या व्याख्या–अचिरोद्गतकेऽपि च सूर्ये कोऽर्थः? प्रथमोदिते रवौ चैत्यस्तूपगते च वायसे अनेनोच्चविवक्षती-त्याह, भित्तिगते चातपे, अनेनोच्चतर इत्यर्थः, हे सखि! सुखिनो हुर्वाक्यालंकारे, जनो न बुध्यते, न निद्रां जहाति, अनेनात्मनो दुःखित्वं प्रकटयति, सा हि भर्तृविरहदुःखिता न रात्रौ निद्रां लब्धवतीति मागधिकार्थः जननीप्रोक्तामिमा मागधिकां श्रुत्वा पुत्री विनिद्रा प्राह—

*तुमेवह अंब मालवे। म हु विमाणे य जक्खमागयं ॥ जक्खो अ न हु एह तायए। अन्नं माय गवेस तातयं १ अस्या व्याख्या–त्वमेवांब मातः! ह इत्यामंत्रणे अलाप्युक्तवती शिक्षासमये, य यथा 'माहुत्ति' मैव 'विमा-णयति' यक्षमागतं विमुखं मा कृथाः 'जक्खोयति' अयं अयक्षः, न त्वयं तातकः पिता, हे मातरन्यं तातं गवेषयेति मागधिकार्थः. ॥ १ ॥ पुनर्माता भणति—नव मासह कुच्छि धारिया। जस्सासपस्सपुरीसमद्दियं ॥ धुयाए तएमिगोहिओ। हरिओ सरणासरणयं ॥ १ ॥ अस्या व्याख्या—नवमासान् यावत्कुक्षौ धारिता, यस्याः प्रश्रवणं पुरीषं च मर्दितं, 'धुयाए तएत्ति' तया दुहित्रा 'मेत्ति' मम गोहिको भर्ता हृतश्चौरितस्ततो हेतोः शरणमशरणं मम जातमिति गम्यं. हितं कुर्वत्या ममाहितं जातमिति मागधिकार्थः. ॥ १ ॥ यथा तस्याः पुत्र्या मातृपित्राभ्यां विनाशः कृतस्तथा मातृपितृतुल्येन भवता मद्विनाशः क्रियमाणोऽस्ति. एवं त्रसकायिकेनोक्तेऽपि स आचार्यो न निवर्तते. अथ त्रसकायिकश्चतुर्थीं कथामाह—

* आ कथामां केटलोक भाग स्पष्ट लखवानुं अस्थाने जणावाथी संक्षेपमां सर्व अर्थ आपवामां आवेल छे

*आम कही योग साधी आप्यो. पेलो भ्रष्ट त्यांज सूइ रह्यो. पुत्रीए शरावथी ढांकेल दीवो उघाडी ओळख्यो अने मानुं कपट जाण्युं. सवारे माए आवी जोइने कह्युं के-(अइरुग्ग०) सूर्य उग्यो कागडा बोल्या तडका भींते चडया तोय सुखिया न उठे त्यारे पुत्रीए कह्युं के—(तुमे०) हे अंब! तुंज बोली हती के यक्षनुं अपमान मा करजे तो हवे आ यक्ष थयो माटे मारो बाप अन्य खोळी ले. त्यारे माए कह्युं—( नव० ) नद मास उदरमां धारण करी वळी जेनां मूत्र मळ चोळ्यां तेणेज घरनो भर्त्ता हर्यो. आतो शरणज अशरण थयुं. आ मातापिताए पुत्रीनो विनाश कर्यो तेम तमे पण मावाप समान थइने जगत्नो विनाश करो छो. आम ए त्रसकायिके कह्या छतां पण ज्यारे ते आचार्य निवृत्त न थया त्यारे तेणे चोथी कथा कही—

---

एकस्मिन् ग्रामे एकेन ब्राह्मणेन यज्ञार्थं सरोऽकारि, सरःसमीपे वनमपि च कारितं, तत्रानेकान् पशून् जुहन् द्विजो मृतस्तत्रैव ग्रामेऽजोऽजनि, सचरणार्थं बहिर्याति, सरोवनं च पश्यति, ततो जातिस्मरणवान् जातः. अन्यदा तत्सुतेन यज्ञः कर्तुमारेभे, तदर्थमसावेवाजस्तेन सुतेन तत्रैव नीयमानो गाढस्वरेण पूत्कारं कुर्वन् केनचिन्मुनिमा सातिशयज्ञानेन दृष्टो भणितश्च—वियड खणावी तइं छगल। तइआरोविअरुक्ख ॥ जन्नपवत्तण तइं कीयओ। काइं बूबु मुरक्ख ॥१॥

---

एक गाममां एक ब्राह्मणे यज्ञार्थ तळाव गळाव्युं. तळावने समीपे वन पण बनराव्युं, त्यां अनेक पशुओ राखी यज्ञ करनारो ए ब्राह्मण मृत थयो. वासनाबले तेज गाममां अज थइने अवतर्यो. ते चरवाने बहार जाय त्यारे पोते करावेलां सरोवर

तथा वनने जोतां जातिस्मरण थयुं. एक वखते तेना पूर्वभवना पुत्रे यज्ञ करवा आरंभ कर्यो त्यारे एज अज ते पुत्रे ज्यारे लइ जवा मांड्यो त्यारे मोटे अवाजे पूत्कार शब्द करतो कोइ अतिशय ज्ञानवान् मुनिए दीठो. मुनिए कह्युं के—

---

'वियडत्ति' देशीवचनस्तटाकिकेत्यर्थः. यतिप्रणीतामिमां मागधिकां श्रुत्वाऽजो जातिस्मरणधरो मौनवान् जातः, तत्पुत्रेण साधुः पृष्टः कथसौ मौनी जातः? साधुः प्राहायं तव पिताजयागकरणादज एव जातः, तत्पुत्रेणोक्तमत्रार्थेऽभिज्ञानं किं? साधुः प्राह तव गृहांगणभूनिहितनिधिमसौ पादाग्रेण दर्शयिष्यति. ततस्तथैव तेनाजेन कृतं, पुत्रस्याजस्य च धर्मप्राप्तिर्द्वयोरपि देवलोकगतिर्जाता.

---

[ विअड० ] वीयडी=तळावडी खणावी त्यारे हे छगल! त्यां वृक्ष रोपाव्यां अने यज्ञप्रवर्त्तन तेंज कराव्यां हवे हे मूर्ख! बूंबूं शुं करे छे? यतिए रची संभळावेली आ मागधिका सांभळीने अजने पोताना पूर्वभवनुं स्मरण थतां मौनवान् बनी गयो. तेना पुत्रे साधुने पुछ्युं के आ अज बराडा पाडतो हतो ते एकदम मौनी केम थयो? साधु बोल्या के—आ तारो पूर्वभवनो पिता छे तेणे अजयाग करवाथी पोते अज थइने जन्म्यो छे. पुत्रे पूछ्युं के—तमे साचुं कहो छो तेनी खात्री शी? साधुए कह्युं के—तारा आंगणामां आ तारा पिताए दाटेलो निधि छे आ अज पोताना पगना अग्रभागथी तने देखाडशे, ए अजे एज प्रमाणे कर्युं. पुत्रने तथा अजने बेयने धर्मप्राप्ति थवाथी बन्नेने देवलोकगति प्राप्त थइ.

एवं तेन ब्राह्मणेन शरणं मे भविष्यतीति कृत्वा तटाकसमीपे यज्ञारामो विहितः, स एवास्य वधस्थानतया भवनेन शरणाद्भयमुत्थितमिति शब्दपदं जातं. एवं भवंतोपि शरणागतानामस्माकमनर्थकारिणो जाताः. एवमुक्तोऽपि त्रसकायिककुमारस्याभरणानि गृहीतानि. एवं षण्णामपि कुमारकाणां पंडितवादिनो यूयमित्युक्त्वाभरणान्यादायाग्रे चलितः सूरिः. पुनस्तेन देवेन सम्यक्त्वपरीक्षार्थं हारकंकणाद्यलंकृता साध्व्येका दर्शिता.

---

एम ए ब्राह्मणे मने शरणरूप थशे एटला माटे तळाव समीपे यज्ञाराम कर्यो एज तेना वधस्थानरूपे थयो, त्यारे कह्युं के आतो शरणमांथी भय उत्पन्न थयुं आवीरीते आप पण शरणगत बनेला अमोने अनर्थकारी थया. आटलुं कहेतां छतां पण ए त्रसकायिककुमारनां सघळां आभरणो ए आचार्यो उतारी लइ पात्रांमां नाख्या. एम छए कुमारोने 'तमे बधा पंडितवादि छो' एम कहीने आभरण लइने आगळ चाल्या त्यां एज देवे पुनः सम्यक्त्व परीक्षार्थ एक साध्वी स्त्री हारकंकण वगेरे अलंकारवाळी आगळ देखाडी.

---

तां दृष्ट्वा सूरिरेवमाख्यत्, हे प्रवचनोड्डाहकारिके! दूरतो व्रज? मुखं मा दर्शय? रुष्टया तयोक्तं–राइसरिसवमित्ताइं। परिच्छद्दाइं पाससि॥ अप्पणो बिल्लमित्ताइं। अपि छिद्दाइं न पाससि॥ १॥ तव पतद्गृहे किमस्तीति तया प्रत्युतोपालब्धस्तथाप्यसौ न प्रतिबुद्धः. अग्रे चलता तेनाचार्येण स्कंधवारगतो राजा दृष्टः, तेन राज्ञाचार्यो वंदितः, प्रोक्तं च हे प्रभो! पात्रकं धर? प्रासुकमोदकान् गृहाण? ततः स पात्रक्षिप्ताभरणदर्शनभीत्यावद्-

दहमद्याहारं न करिष्ये, राज्ञा च हठाज्झोलिकातः पात्रं कर्षितं, आभरणानि दृष्टानि.

तेने जोइने सूरि बोल्या के-हे प्रवचनोड्डाह कारिके! अर्थात् प्रवचनमां अडचण करनारी! दूर चालीजा. अहीं मुख मा देखाड. आ सांभळी रुष्ट थयेली ते स्त्रीए कह्युं के-राजिसर्षपमात्राणि परच्छिद्राणि पश्यसि-आत्मनो बिल्वमात्राणि छिद्राणि न हि पश्यसि=राइ तथा सरसव जेवडां पण पारकां छिद्र देखो छो अने पोतानां बिल्व बिलां जेवडां छिद्र पण नथी देखता? तारा आ पडुं पडुं थइ रहेला घरमां शुं छे? आवी रीते ते साध्वी स्त्रीए समजाव्यो तथा उपालंभ=ठपको=दीधो तो पण ज्यारे न समज्यो अने आगळ चाल्यो त्यां ते आचार्ये एक सेना संनिवेशमां आवेलो राजा दीठो. ते राजाए आचार्यनुं वंदन कर्युं अने कह्युं के—'हे प्रभो! पात्र धरो अने उत्तम मोदक ग्रहण करो. ते अवसरे पात्रांमां पोते आभरण भर्यां छे ते देखाइ जाय एवी ब्हीकथी कह्युं के-आज मारे आहार नथी करवो. पण राजाए हठथी तेनी झोळीमांथी पात्रुं खेंच्युं त्यांतो बधां आभरण दीठां.

राज्ञोक्तं हे अनार्य! किं त्वया मत्पुत्रा व्यापादिताः? इत्यादिवचनैस्तर्जितः स सूरिर्भयभ्रांतो न किंचिदूचे, पश्चान्मायाजालं संहृत्य स शिष्यदेवः प्रकटीभूतः, स्ववृत्तांतं चाकथयत्, एवं चोपदिष्टवान् हे प्रभो! यथा नाऽहं पश्यता षण्मासान् यावत्क्षुत्तृषा न ज्ञाता. एवं देवा अपि दिव्यनाट्यं पश्यंतो न किंचित्स्मरंति, नाप्यत्रागमनोत्साहं कुर्वंति, यतः सिद्धांतेऽप्युक्तं.

राजाए कह्युं के-हे अनार्य! शुं तें मारा पुत्रोने मारी नाख्या? आवां आवां वचनोथी तरछोड्यो त्यारे ते सूरि भयभ्रांत

थइने कंइ बोली न शक्यो. पछी पोते पाथरेली मायाजाळ संकेली पेलो देव थयेलो शिष्य प्रकट थयो अने पोतानुं तमाम वृत्तांत कहुं, ने उपदेश कर्यो के–हे प्रभो ! जेम नाटक जोतां छ मास सुधी भूखतरसनी खबर न पडी एम देवपण दिव्य नाटको जोतां कंइ पण संभारता नथी तेम तेओ अत्रे आववानो उत्साह पण राखता नथी. सिद्धांतमां पण कहुं छे के—

---

संकंतदिव्वपेमा । विसयपसत्ता समत्तकत्तव्वा ॥ अणहीणमणुअकज्जा । नरभवसुहं न इंति सुरा ॥ १ ॥ इत्यादि शिष्यदेववाक्यैः स प्रतिबुद्धः, सिद्धांतवचनास्थां कृत्वा पुनः संयमे लीनः, पूर्वं तेन दर्शनपरीषहो न सोढः, पश्चात् सोढः अथ कस्य कर्मण उदये कः परीषहोदयः स्यादित्याह–दर्शनमोहनीयोदयाद्दर्शनपरीषहः स्यात्. ज्ञानावरणीयोदये प्रज्ञापरीषहः स्यात्, तस्यैवोदयेऽज्ञानपरीषहोऽपि स्यात्, अंतरायकर्मोदयेलाभपरीषहः स्यात्, चारित्रमोहनीयकर्मोदये आक्रोश १ अरति २ स्त्री ३ नैषेधिकी ४ अचेल ५ याचना ६ सत्करीः ७ एते सप्तपरीषहा उत्पद्यंते, शेषा एकादश वेदनीयकर्मोदये उत्पद्यंते. ॥४५॥ अथ सर्वोपसंहारगाथामाह—

---

( संकंत० ) दिव्यप्रेममां सक्त रहेनारा सुरा=देवो विषयाप्रसक्त अने समाप्तकर्त्तव्य होइ मनुष्य कार्योने नापसंद करता असुखरूप नरभवमां नथी आवतां. इत्यादि ए शिष्य देवनां वचनो वडे ते सूरि प्रतिबुद्ध थइ–बोधलाभ पामी सिद्धांत वचनोमां पूर्ण आस्था करी पुनः संयममां लीन थया. पूर्वे तेणे दर्शनपरीषह नहोतो सह्यो पण पाछलथी सहन कर्यो.

—हवे कया कर्मनो उदय थतां कयो परीषह थाय ते कहे छे—

दर्शनमोहनीय कर्मनो उदय थतां दर्शनपरीषह उद्भवे छे. ज्ञानावरणीयनो उदय थतां प्रज्ञापरीषह थाय छे. अने तेनाज उदयमां अज्ञानपरीषह पण थाय छे. अंतराय कर्मनो उदय थतां अलाभपरीषह थाय छे. चारित्रमोहनीय कर्मना उदयावसरे आक्रोश, अरति, स्त्री, नैषेधकी, अचेल याचना अने सत्कार; ए साते परीषह उद्भवे छे. बाकीना अगीआर परीषहो वेदनीयकर्मोदय थतां उत्पन्न थाय छे.

---

एए परीसहा सव्वे । कासवेणं पवेईया ॥ जे भिक्खू न विहन्निज्जा । पुट्ठो केणइ कहु त्तिबेमि ॥ ४६ ॥

(एए) आ [सव्वे] सर्वे (परीसहा) परीषहो (कासवेणं) काश्यपगोत्रीय (पवेदआ) प्ररूप्या छे (जे) के जे (भिक्खु) साधु (केणइ) कोइपण परीषहवडे (कण्हुइ) कोइपण ठेकाणे (पुट्ठो) स्पर्श कराया होय तो पण (न विहन्नेज्जा) हणाता नथी. (त्तिबेमि) ए प्रमाणे परीषह नामनुं बीजुं अध्ययन कह्युं छे, ४६

---

व्याख्या—एते द्वाविंशतिः सर्वे परीषहाः काश्यपेन श्रीमहावीरेण प्रवेदिताः, प्रकर्षेण ज्ञाताः, यान् ज्ञात्वा भिक्षुः साधुः केनापि परीषहेण स्पृष्टः सन् कुत्रचित्कस्मिंश्चित्प्रदेशे कस्मिंश्चित्काले वा न विहन्येत संयमान्न पात्येत. ॥ ४६ ॥

अर्थः—आ सर्वे परीषह काश्यपभगवाने पोते श्रीमहावीरे प्रवेदित=जाणिने ज्ञापित कर्या छे. जेने जाणीने भिक्षु साधु कोइ पण परीषहथी स्पृष्ट थइ क्यांय=कोइ पण प्रदेशमां कोइ पण काळे विहत थतो नथी. संयमथी पतित थतो नथी.

इदं हि कर्मप्रवादनामाष्टमो हि पूर्वस्तस्य सप्तदशं प्राभृतं, तस्योद्धारलेशं द्वितीयमध्ययनमुत्तराध्ययनस्य.

आ कर्मप्रवाद नामना अष्टम पूर्वनुं सप्तदश=सत्तरमा प्राभृतना उद्धारलेश उत्तराध्ययननुं द्वितीय अध्ययन कहेवाय छे.

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यश्रीवल्लभगणिविरचितायां द्वितीयमध्ययनं संपूर्णम्. ॥

आ प्रमाणे उत्तराध्ययनी उपाध्याय लक्ष्मीकीर्तिगणि शिष्य श्रीलक्ष्मीवल्लभगणिए विरचित सूत्रार्थदीपिका नामनी टीकामां बीजुं परीषहाध्ययन पूर्ण थयुं.

## ॥ अथ तृतीयमध्ययनं प्रारभ्यते ॥

अथ द्वितीयाध्ययनेन सह तृतीयाध्ययनस्य संबंधमाह—किमालंबनं कृत्वैते परीषहाः सोढव्याः? इति प्रश्ने उत्तरं चतुरंगदुर्लभत्वालंबनेन संबंधमाह—

અથ દ્વિતીયાધ્યયની સાથે તૃતીયાધ્યયનનો સંબંધ=સંગતિ=દર્શાવે છે. શું આલંબન કરીને આ બધા પરીષહો સહન કરવા? આવો પ્રશ્ન થાય ત્યાં ચતુરંગ દુર્લભત્વના આલંબનવડે—(એ પરીષહો સહેવા) એમ ઉત્તર સૂચવી સંબંધ કહે છે.

चत्तारि परमंगाणि । दुल्लहाणीह जंतुणो ॥ माणुसत्तं सुई सद्धा । संजमंमि य वीरियं ॥१॥

(इह) આ સંસારમાં (जंतुणो) પ્રાણીને (चत्तारि) ચાર (परमंगाणि) ધર્મના મુખ્ય અંગો (दुल्लहाणि) દુર્લભ છે. (माणुसत्तं) મનુષ્યપણું (सुइ) ધર્મનું શ્રવણ (सद्धा) શ્રદ્ધા થવી તે [अ] તથા (संजमम्मि) સંયમને વિષે (वीरिअं) સમર્થ્ય ફોરવવું. ૧

व्याख्या—एतानि चत्वारि परमांगानि, परमाण्युत्कृष्टानि, अंगानि मोक्षसाधनोपायानि, परमत्वं ह्येतेषा प्राप्तिं विना मुक्तिप्राप्तेरभावात्, कथंभूतानि परमांनि? जंतोर्जीवस्य दुर्लभानि, एतानि कानि? मनुष्यत्वं मनुष्यजन्म, पुनः श्रुतिर्धर्मस्य श्रवणं, पुनः श्रद्धा धर्मे रुचिः, पुनः 'संजमंमि' संयमे साध्वाचारपालने वीर्यं सामर्थ्यं बलस्य स्फोरणं, अत्र—

अर्थः—आ चार परम=उत्कृष्ट=अंग=मोक्षसाधनना उपायभूत आ संसारमां जीवने दुर्लभ छे. ए अंगने 'परम' आवुं विशेषण आप्युं छे ते एम बतावे छे के-ए अंगोनी प्राप्ति विना मुक्तिलाभ मळतो नथी. ए प्राणीने दुर्लभ चार अंग क्यां? ते कहे छे. पहेलुं तो मनुष्यत्व=मनुष्यजन्म, बीजुं श्रुति=धर्मशास्त्रं श्रवण त्रीजुं श्रद्धा-धर्ममां रुचि, अने चोथुं संयममां एटले साध्याचार पाळवामां वीर्य-सामर्थ्य-बलनी स्फूर्त्ति आ चार परम दुर्लभ अंग आगमोक्त छे.

चुल्लगपासकधन्ने । जूए रयणए य सुमिणचक्के अ ॥ चम्मयुगे परमाणू । दस दिट्ठंता मणुअलंभे ॥ १ ॥ दशदृष्टांतवन्मनुष्यत्वं दुर्लभमुक्तं तत्र चोल्लगदृष्टांतो यथा—

आ विषयमां—( चुल्लग० )—चोल्लग, पाशक, धान्य, द्यूत, रत्न, सूवीणा, चक्र, चर्म, युग, परमाणु; आ दश दृष्टांत मनुष्यत्वनुं दुर्लभपणु स्पष्ट दर्शावे छे.

चोल्लगं परिपाटीभोजनं, तदर्थं कथा—कांपिल्यनगरे ब्रह्मराजा, चुलनो भार्या, तयोः पुत्रो ब्रह्मदत्तः. एकदा मृतः पिता, ब्रह्मपुत्रो बाल इति कृत्वा मित्रद्वयप्रहितो दीर्घपृष्टनामा राजा तद्राज्यं रक्षति, स चुलन्यामासक्तो जातः, ब्रह्मदत्तेन तयोरनाचारो ज्ञातः, शूलप्रोतपिष्टमयकुर्कुटकुर्कुट्यादिसंबंधफलदर्शनेन ताभ्यां स्वानाचारभीताभ्यां कन्या ब्रह्मदत्तस्य परिणायिता, जतुगृहं च कारितं, तावता धनुमंत्रिणा तयोः कपटं ज्ञातं, जतुगृहात्सुरंगा खानिता, सुरंगाद्वारेऽश्वद्वयं स्थापितं, स्वपुत्रस्य वरधनुनाम्नस्तत्स्वरूपं ज्ञापितं, सुरंगामार्गश्च दर्शितः

प्रथम चोल्लग दृष्टांत कहे छे–चोल्लग=एटले=परिपाटी भोजन=तदर्थ कथा कहे छे.–कांपिल्य नगरमां ब्रह्म नामे राजा तेने चुलनी नामनी भार्या ए बेयनो पुत्र ब्रह्मदत्त नामे हतो. ज्यारे ब्रह्मराजा मरी गयो त्यारे ब्रह्मदत्त बालक होवाथी तेना बापना बे मित्रोए एक दीर्घपृष्ठ नामना राजाने मोकल्यो ते राज्यनी रक्षा करतो. ते चुलनीमां आसक्त थयो. आ अनाचार ब्रह्मदत्तपुत्रना जाणवामां आव्यो. पिष्टनां कुकडी कुकडो करीने ते बन्नेने शूलीमां परोवी देखाड्यां तेथी दीर्घपृष्ट तथा चुलनी मनमां पोताना अनाचारथी भय पाम्यां अने ब्रह्मदत्तने एक कन्या परणावी. प्रपंच एवो रच्यो के जतु=लाखनुंघर बनाव्युं तेमां ब्रह्मदत्त तथा तेनी वधू बेयने सूवानुं कर्युं. आ कपट धनुमंत्रीए जाण्युं ते उपरथी तेणे ए जोगणीना घरमां सुरंग खोदावी अने तेनुं द्वार छेटे रखाव्युं ए द्वार आगळ बे घोडा पवनवेगी रखाव्या अने पोताना पुत्र वरधनु नामनाने आ बधी वावतथी वाकेफ करीने सुरंगनो मार्ग देखाडी राख्यो.

---

ब्रह्मदत्तस्य वरधनुरनुचरः कृतः. अन्यदा मातृप्रेरितो ब्रह्मदत्तः कन्यासहितो जतुगृहे सुप्तः, वरधनुः प्रत्यासन्न एव सुप्तः, मध्यरात्रौ मात्रा ज्वालितं गृहं, उत्थितो ब्रह्मदत्तस्तस्य च वरधनुना सुरंगामार्गो दर्शितः. ततो निर्गत्य वरधनुमित्रेण सह ब्रह्मदत्तोऽश्वद्वयमधिरुह्य दूरदेशे गतः, अत्यंतपथश्रमादश्वद्वयं मृतं पादचारेण मित्रेण सह ब्रह्मदत्तः पृथिव्यां भ्रमति.

---

ब्रह्मदत्तना अनुचर तरीके पोताना पुत्र वरधनुने राखी दीधो. एक वखते ज्यारे ब्रह्मदत्त तथा तेनी वहु ए घरमां सुतां हतां ते

लाग जोइने तेनी मा चुलनीए ए घरमां अग्नि लगाडयो. आ समये पेलो वरधनु मन्त्रिपुत्र ब्रह्मदत्त पासेज सूतो हतो ते चेत्यो झट उठी ब्रह्मदत्तने जगाडी सुरंग मार्गे नीकळ्या त्यां बे घोडा हाजर हता ते उपर बेय जणा सवार थइने घणे दूर नीकळी गया. लांबा पंथना धाडाथी बेय घोडा फाटी पडया. अने ब्रह्मदत्त तथा वरधनु पगपाळा चाल्या.

---

एकदा दीर्घपृष्टप्रेषितं सुभटवृन्दं दृष्ट्वा वरधनुः पृथग्गतः, कुमारस्त्वेक एव भ्रमन् केनचिद्विप्रेण दृष्टः, तेन सहाटवीमुत्तीर्णः, पृथग्व्रजंतं विप्रं प्राह कुमारः, भो ! यदा मम राज्यप्राप्तिः स्यात्तदा त्वयागंतव्यमिति.

---

पाछल दीर्घपृष्ठे मोकलेल सुभटनुं टोळुं जोइने वरधनु तो छुटो पडी गयो, एकलो ब्रह्मदत्त फरवा लाग्यो. त्यां तेने एक ब्राह्मण मल्यो तेनी साथे ए अटवी=वेरानजंगल उतर्यो. ब्राह्मण ज्यारे ब्रह्मदत्तथी जूदो पडी बीजे मार्गे जवा लाग्यो त्यारे ब्रह्मदत्ते तेने कह्युं के–'मने ज्यारे राज्य प्राप्ति थाय त्यारे मारी पासे आवजो.

---

अथ कुमारो माहाराजा जातः, चक्रवर्तिपदवीं प्राप्तः, तदानीमागतः स ब्राह्मणः, उपानद्ध्वजप्रयोगेण मिलितः, चक्रवर्तिनोपलक्षितः, कुशलं पृष्टं, प्रोक्तं च मनोऽभीष्टं मार्गय ? स प्राह ब्राह्मणीं पृष्ट्वा मार्गयिष्यामि, गतस्तस्याः समीपं, कथितवानेवं चक्रवर्ती मम तुष्टोऽस्ति, किं मार्गयामि? तया विमृष्टं—प्रवर्धमानः पुरुष—स्त्रयाणामुपघातकः॥ पूर्वोपार्जितमित्राणां। दाराणामथ वेश्मनां ॥ १ ॥ इति विमृश्योक्तं किं संतापकारिणा बहूपरिग्रहेण ! प्रार्थय ? भरतक्षेत्रे प्रतिगृहं भोजनं दीनारयुगभं च ? ततो विप्र आगत्य तथैव चक्रिणं प्रार्थयामास.

कुमार ब्रह्मदत्त राजधानिमां आव्यो अने राजा थयो. एटलुंज नहिं पण चक्रवर्त्तीपद पाम्यो. त्यारे पेलो ब्राह्मण आव्यो ते लाकडीमां ध्वजा ठेकाणे उपानद् परोवेल लइने मल्यो. चक्रवर्तीए ओळख्यो कुशल पूछयुं; कह्युं के-' तारा मनमां जे अभीष्ट होय ते मागी ले ' त्यारे ब्राह्मणे कह्युं के-' हुं मारी स्त्री ( ब्राह्मणी ) ने पूछी आवुं ते पछी मागीश. ' ब्राह्मणे पोतानी स्त्री पासे जइ कह्युं के-चक्रवर्ती प्रसन्न थयो छे अने मने ' मनमां आवे ते माग ' एम कहे छे तो हुं शुं मागुं ! ब्राह्मणीए विचार्युं के-' पुरुष ज्यारे संपत्तिनी वृद्धि पामे त्यारे पूर्वना मित्र स्त्री अने घरनो घातकी थाय. आम विचारी ' शुं ठाला बहु उपाधि करे तेवा वैभव पामीने करवानुं हतुं ? माटे मागो के-' भरतक्षेत्रमां घरदीठ भोजन तथा बब्बे दीनार दक्षिणा मले तेम करी आपो ' आ प्रमाणे स्त्रीनी सलाह लइ ब्राह्मणे ब्रह्मदत्त पासे आवीने एज माग्युं.

---

चक्री हसित्वोवाच भो किमनया विडंबनया ? देशग्रामभांडारादि प्रार्थय ? स तदेव प्रार्थयति. नान्यत्किमपीति. चक्रिणा विचारितं—जो जत्तिअस्स अत्थस्स । भायणं तस्स तत्तीअं होइ ॥ वुट्ठेवि दोणमेहे । न डुंगरे पाणियं ठाइ ॥ १ ॥

---

' अरे मारा जेवो चक्रवर्ती राजा मोढे माग्युं देवा तत्पर थाय छे त्यारे आ ब्राह्मण आटलुंज केम मागे छे? एम धारी राजा हसीने बोल्या 'अरे! आ तें शी विडंबना वहोरी? कंइ देश गाम भंडार जेवुं माग=आ शुं तें माग्युं? ब्राह्मण कहे ना मारे तो एज जोइए, बीजुं कशुंये नहिं चक्रवर्ती विचारे छे के—' यो यावतः अर्थस्य भाजनं तस्य तावदेव भवति; वृष्टेऽपि

द्रोणमेघे न पर्वते पानीयं स्थायि ' जे जेटला अर्थनुं पात्र होय तेने तेटलुंज मळे छे. भले मेघ द्रोळगमे वर्षे पण डुंगर उपर पाणी ठेरे नहिं.

---

इति विचिंत्य प्रतिपन्नं तच्चक्रिणा, प्रथमदिने स्वगृहे सकुटुंबस्य तस्य भोजनं कारितं दिनारयुगलं च दत्तं. एवं स ब्राह्मणो भरतक्षेत्रसंबंधिसमस्तगृहेषु भोजनं गृहीत्वा पुनश्चक्रिणो गृहे भोजनं कर्तुमायाति किं ? कदाचिद्दिव्यानुभावादायात्यपि, परं मनुष्यावताद्भ्रष्टः पुनर्मनुष्यावतारे नायातुं शक्नोतीति. मनुष्यभवदुर्लभतायां चोल्लग दृष्टांतः प्रथमः. पाशकदृष्टांतो यथा—

---

आम विचारी चक्रवर्तीए कबूल कर्युं के–'भले तेम मळशे' पहेले दिवसे राजाए पोताने घरेज ए ब्राह्मणने तेना समग्र कुटुंब सहित भोजन करावी बे दीनार अर्पण कर्या. एवीरीते ब्राह्मण भरतक्षेत्रनां समस्तघरे भोजन लइने पाछो चक्री=राजा=ने घरे भोजन करवाने दिव्यानुभावने लीधे आवे; पण मनुष्यावतारथी भ्रष्ट थयेलो फरीने मनुष्यावतारमां आवी शकतो नथी. आवुं मनुष्यत्व दुर्लभ छे. मनुष्यभवनी दुर्लभतामां चोल्लग दृष्टांत प्रथम कहीने हवे बीजो पाशकदृष्टांत कहे छे.

---

गोल्लदेशे चणकग्रामोऽस्ति, तत्र चणकब्राह्मणः श्राद्धः, एकदा तस्य गृहे साधवः स्थिताः, तदानीं सदंष्ट्रस्तस्य पुत्रो जातः, दर्शितः साधूनां, साधुभिरुक्तं सदंष्ट्रत्वेनासौ राजा भविष्यति. पित्राविमृष्टमसौ राजा भूत्वा नरकं गमिष्यतीति भीत्या तस्य दंष्ट्रा घर्षिता, पुनस्तादृशो गुरुणां दर्शितः, तैरुक्तमेकपुरुषांतरितो राजा भविष्यतीति. तस्य बालस्य चाणिक्य इति नाम दत्तं. अथासौ वर्धमानश्चतुर्दश विद्यास्थानानि पठित्वा कालांतरेण परिणीतः.

गोल्लदेशमां चणक नामे गाम हतुं तेमां चणक नामे ब्राह्मण श्रावक तेने घरे साधुओ आवी रह्या त्यारे तेने घरे दांत तथा दाढसहित पुत्र अवतर्यो, तेणे ए पुत्र साधुओने देखाड्यो त्यारे साधुओए कह्युं के—'दाढसहित जन्म्यो छे तेथी ए राजा थशे'—पिताए जाण्युं के—आतो राजा थइने नरके जशे एवी ब्हीकथी तेणे ए बालकनी दाढ घसावीनाखी अने पाछो गुरुने देखाड्यो त्यारे वली गुरुए कह्युं के—हवे ए बाळक राजा नहिं थाय पण ए बाळकनो जे पुत्र थशे ते राजा थशे. ए बाळकनुं चाणक्य एवुं नाम पाड्युं. ए चाणक्य मोटो थयो अने चउद विद्यास्थान भणीने समये परण्यो.

---

अन्यदा चाणिक्यभार्या भ्रातृविवाहे गता, तत्रान्या अपि सद्द्रव्यपतिकास्तद्भगिन्यो बहवः समायाताः, ताश्च मातृपितृभ्रातृभिर्बहुमानिताः, इयं चोपेक्षितप्राया खिन्नेवमचिंतयन्मम पत्युर्निर्धनत्वेनैते पित्रादयोऽपि मां न मन्यंते, खिन्ना सती सा पश्चादायायाता, चाणिक्येन तस्याः खेदस्वरूपं पृष्टं, पितृगृहे सर्वासां भगिनीनां मानं स्वापमानं चोक्तं.

---

एक समये चाणक्यनी भार्या पोताना भाइना विवाह उपर गइ त्यां बीजी पण केटलीक धनाढ्य पतीवाळी घणी स्त्रीओ भेळी मळी हती ते स्त्रीओ तेओना मातापिता भाइ वगेरे संबंधीनी मानीती हती पण आ चाणक्यनी स्त्रीना तरफ सर्वेनी उपेक्षा जेवुं लागवाथी तेतो मनमां खिन्न थइने विचारमां पडी के—मारो पति निर्धन छे तेथी मारां मातापिता भाइ वगेरे मारुं सन्मान करता नथी, आम विचार करती खिन्न मनथी पाछी आवी त्यारे चाणक्ये तेना

खेदनुं कारण पूछतां 'पिताने घरे बीजी बधी बहेनोनुं सारुं सन्मान थयुं अने मने कोइए मान न आप्युं. आ अपमानथी मारुं मन खेद पामे छे.'

---

चाणिक्यश्चिंतयति-अलियंपि जणो धण-इत्थयस्स लयणत्तणं पयासेइ ॥ परमत्थबंधवेणवि । लज्जिज्जइ हीण-विहवेण ॥ १ ॥ तथा-कज्जविहूणाण नेहो । अत्थविहूणाण गउरवं लोए ॥ पडिवन्ने निव्वहणं । कुणंति जे ते जए विरला ॥२॥ इति चिंतयित्वा द्रव्योपार्जनार्थं नंदराजाधिष्ठिते पाटलीपुरे गतः.

---

आ सांभळी चाणक्ये विचार कर्यो—'जन, धन स्त्री आदिकनो अलीक=दांभिक=केवळ देखाव प्रकाश करे छे पण ज्यारे ए अर्थ-धनादि विनानो थाय त्यारे पोताना हीन वैभवथी लजाय छे.' तेमज—कार्य विनाना साथे स्नेह, अर्थ-धन वहोणानुं गौरव करवुं अने कोइ प्रतिपन्न-पोताने आश्रये आवी पड्यो-तेने नभाववो, आ त्रण काम जेओ करे तेवा जन आ लोकमां विरला थोडा छे. आम विचारीने द्रव्य उपार्जन करवा नंदराजा ज्यां राज करे छे एवा पाटलीपुरमां गया.

---

तत्सभायां पूर्वदिग्न्यस्ते आसने निषण्णः, तत्र नंदेन समं कश्चिनैमित्तिकस्तत्रायातः, तेनोक्तमेष ब्राह्मणो नंदवंशस्य छायामतिक्रम्य स्थितोऽस्तीति; तद्वाक्यश्रवणाद् भृत्यैरुत्थापितो द्वितीये आसने उपविष्टः, प्रथमे

करवर्तिं स्थापयति, तृतीये दंडकं, चतुर्थे जपमालां, पंचमे यज्ञोपवीतमेवं चेष्टां कुर्वन्नसौ नंदमृत्यैः शठ इति कृत्वा यष्ट्यादिभिराच्छोटितो द्वेषमापन्नस्तदानीमेवमुवाच—

---

नंदराजानी सभामां गया त्यां तेमने पूर्वदिशामां आसन नाखी आप्युं ते उपर बेठा. त्यां नंदनी साथे एक नैमित्तिक= शकुनादि जाणनार=आव्यो तेणे कह्युं के—' आ ब्राह्मण नंदवंशनी छायानो अतिक्रम करीने बेठेलो छे ' आ वाक्य सांभलीने नोकरोए उठाड्यो एटले ए प्रथम आसन उपर पोतानो लोटो मूकी पोते बीजा आसन उपर बेठो, बीजा आसनपरथी उठाड्यो तो ते आसन उपर दंड मूकी त्रीजा आसन उपर बेठो, त्यांथी उठाड्यो त्यारे तेनापर जपमाला मूकीने चोथा आसने गयो. त्यांथी उठाड्यो के ते पर यज्ञोपवीत राखीने अन्य आसने बेसवा जाय छे त्यां राजनोकरोए तेने शठ जाणी लाकडीथी मार्यो आथी ते क्रोधमां आवीने तेज क्षणे बोल्यो के—

---

कोशेन भृत्यैश्च निबद्धमूलं। पुत्रैश्च मित्रैश्च विवृद्धशाखं ॥ उत्पाटय नंदं परिवर्तयामि । महाद्रुमं वायु रिवोग्रवेगः ॥ १ ॥ ततो बिंबांतरितो राजा भविष्यामीति स साधुवचः स्मरन् भाग्यवंतं पुरुषं विलोकयन् मेदिन्यां भ्रमति. अन्यदा नंदस्य मयूरपालकाणां ग्रामे गतः परिव्राजकवेषेण चाणिक्यः, तत्र मयूरपालकवृद्धस्य गर्भिण्याः स्त्रियश्चंद्रपानदोहदो जातः.

'खजानो तथा नोकर चाकरथी जेनां मूळ जाम्यां छे, पुत्रमित्रादिकथी जेनी शाखाओ वधी छे, एवा आ नंदरूपी वृक्षने, महोटा वृक्षने जेम उग्रवेगवाळो वायु उथलावी नाखे तेम हुं उखेडी नाखीश; त्यारे हुं जूदारूपमां राजा थइश.' आ समानुं वचन याद करतो भाग्यवान् पुरुषने खोळतो पृथ्वीमां भमवा लाग्यो. एक समये फरतो फरतो नंदना मयूर पाळनारना गाममां चाणक्य संन्यासी वेषे जइ चड्यो. त्यां ए मयूरपालक वृद्धनी गर्भिणी स्त्रीने चंद्रपान करवानी हेळ [ गर्भिणी स्त्रीने इच्छा थाय ते हेळ कहेवाय ] थइ.

---

तया पित्रादीनामुक्तं, पित्रादिभिर्गृहागतस्य चाणिक्यस्योक्तं, चाणिक्येनोक्तमहं बुध्या दोहदमस्याः पूरयिष्यामि, यद्यस्याः पुत्रमष्टवार्षिकं मे ददत? तैस्तथेतिप्रतिपन्नं, चाणिक्येन सा सच्छिद्रमंडपे शायिता, तन्मुखाभिमुखोच्चैस्तरप्रदेशे शर्करामिश्रदुग्धभृतस्थालप्रयोगो विहितः, तद्बिंदवस्तस्यामुखे पतिताः.

---

तेणीए पोताना पिता वगेरेने जणाव्युं अने पिता वगेरेए घरे आवेला चारणक्यने कह्युं त्यारे चाणक्ये कह्युं के–हुं बुद्धि कल्पनाथी तेनो ए दोहद=मनोरथ पूर्ण करीश आम कहीने तेणे एक शरत मागी के–'तमे आ स्त्रीने पुत्र आवे ते आठ वर्षनो थाय के तरत मने आपी देवानुं कबूल करो तो ए गर्भिणीनो संकल्प हमणां पूर्ण करुं. सर्वेए कबूल कर्युं.चाणक्ये ते गर्भिणी स्त्रीने उपरछींडांवाळा मंडपमां सूवारी अने मुख सामो उंचा प्रदेशमां साकर नाखेला दूरथी भरेलो थाळ मूकाव्यो, ते एवी रीते के ए थाळमांथी दूधनां टीपां ते स्त्रीना मुखमां पडे.

ततस्तद्दोहदपूर्तिर्जाता, कालक्रमेण पुत्रो जातस्तस्य चंद्रगुप्त इति नाम दत्तं, यावच्चंद्रगुप्तस्तत्र वर्धते, तावच्चाणिक्योऽपि देशांतरे धातुवादादिकं शिक्षयित्वा पुनस्तत्रागतः. स चंद्रगुप्तो दारकैः समं राजनीत्या क्रीडां कुर्वन् दृष्टः, तत्र समागत्य स बालश्चाणिक्येन याचितः, बालकेनोक्तं मां गृहाण? चाणिक्येनोक्तं गोस्वामी त्वां ताडयिष्यति, तेनोक्तं वीरभोग्या वसुंधरा.

---

आम करवाथी ते गर्भिणीनो चंद्रपान संबंधी दोहद=मनोरथ–पूर्ण थयो. दसमास पूरा थतां ते स्त्रीने पुत्र आव्यो, तेनुं नाम चंद्रगुप्त राख्युं. आ बालक बीजा छोकराओनी साथे क्रीडा करवामां पण राजनीतिनी रमत रमतो दीठो त्यारे चाणक्ये आवीने माग्यो. बालके चाणक्यने कह्युं के–'आप मने लइ जाओ' चाणक्ये कह्युं तने गोस्वामी ताडन करशे; बालके कह्युं के–वसुंधरा तो वीरनी भोग्या छे.

---

चाणिक्येन ज्ञातमयं महानुदारचरित इति ज्ञात्वा कस्यचित्प्रत्यासन्नपुरुषस्य पृष्टमयं कस्य सुतः? तेन मातुर्दोहदपूरकं चाणिक्यमुपलक्ष्य तव पुत्रोऽयमित्युक्तं, चाणिक्य उवाच हे बाल! त्वं चल मया समं? त्वामहं राजानं करोमि चलितश्चाणिक्येन समं बालः, परदेशशिक्षितधातुवादद्रव्यबलेन लोको घनो मेलितः, गत्वा पाटलीपुरं रुद्धं, नंदो बहिर्निर्गत्य तेन समं युद्धं चकार, भग्नश्चाणिक्यः. मेलितो लोकः सर्वोऽपीतस्ततो जगाम, चंद्रगुप्तं लात्वा चाणिक्यो नष्टः.

आ वचन सांभळी चाणक्ये आ बालक महान् उदार चरित थवानो छे आम जाणीने कोइ पांसे उभेला पुरुषने पूछयुं. 'आ केनो पुत्र छे?' तेणे तेनी माना दोहदपूरनार चाणक्य धारीने 'तमारो पुत्र छे?' एम कह्युं. चाणक्ये बालकने कह्युं के- चालो मारी साथे हुं तमने राजा करवानो छुं' ते बालक चाणक्यनी साथे चाल्यो. परदेशमां शीखेल धातुवाद=कीमियागरी=की-मीया-थी मेळवेल द्रव्यना बळवडे घणा लोकोने भेळा मेळवी जइने पाटलीपुर रूंध्युं. आ समये नंदराजा सैन्यसहित बहार नीकळ्यो तेनी साथे युद्ध कर्युं तेमां चाणक्य भाग्यो. भेळा करेला सर्वलोको आम तेम चाल्या गया. अने चंद्रगुप्तने लइने चाणक्य क्यांक अदृश्य थइ गयो.

---

नंदपुरुषा अश्वारूढास्तं विलोकयंति. एते त्वागताः, अहं तु सबालः पादचारी, अश्वारूढाणामेतेषां पुरः क्व यास्यामीति ध्यात्वा सरस्तीरस्थितं रजकं दृष्ट्वा चाणिक्यः प्राह भो रजक! मारणायनंदभटाः समायांति, तद्वचः श्रुत्वा राजको नष्टः, चाणिक्यः स्वयं रजको जातः. चंद्रगुप्तस्तु सरसि प्रवेशितः, एको नंदाश्ववारस्तत्रायातः, तेन पृष्टं भो रजक! चंद्रगुप्तः क्व गतः? रजकः प्राह अस्मिन् सरसि प्रविष्टः, अश्ववारेण स्वघोटकस्तस्यार्पितः, खड्गमपि तस्यार्पितं. स्वयं तु सरःप्रवेशाय यावत्सज्जो भवति. तावता तेनैव खड्गेन स चाणिक्येन द्विधा कृतः.

---

नंदराजाना माणसो घोडाचड चाणक्यने चारेकोर गोतवा नीकली पड्या. माणसोने जोइ चाणक्ये विचार्युं के-आ तो आवी पहोंच्या हुं एकलो, साथे आ बालक, हुं पगपाळो आ घोडास्वारनी आगळ क्यां जइ शकीश? आम मनमां धारी

तळावतीरे उभेला रजक [धोबी] ने जोइ चाणक्ये कह्युं के—'हे रजक! मारवाने नंदनां माणसो आवे छे' आ सांभळी रजक भाग्यो अने चाणक्य पोते रजक थइ उभा रह्या अने चंद्रगुप्तने तळावमां गुसाडी दीधो एक नंदना घोडासवारे आवीने पूछ्युं के—'हे रजक! चंद्रगुप्त क्यां गयो! त्यारे रजकवनी उभेला चाणक्ये कह्युं के–आ तळावमां पेठो छे त्यारे सवारे पोतानो घोडो आ बनावटी रजकने सोंप्यो अने खड्ग पण तेने सोंपी अने पोते तळावमां पेसवाने सज्ज थाय छे त्यां एज खड्गथी चाणक्ये ते सवारना बे भाग करी नाख्या.

---

पश्चात्सरसो निष्कासितश्चाणिक्येन चंद्रगुप्तः, अश्वमधिरोहितः पथि गच्छता चाणिक्येन चंद्रगुप्तः पृष्टो भो यस्यां वेलायां त्वं मयाश्ववारस्य दर्शितस्तदा तव मनसि किमभूत्? चंद्रगुप्तेनोक्तं मयैवं ज्ञातं मम हितायैवं भवताहं दर्शितः. चाणिक्येन ज्ञातं योग्योऽयमेव, पश्चाच्चंद्रगुप्तः क्षुधार्तो जातः, ततश्चाणिक्येन क्वापि स्थाने सद्यो भुक्तस्य बटुकस्य जठरं द्विधाकृत्य दधिकूरं गृहीत, भोजितश्चंद्रगुप्तः.

---

झट तळावमांथी चंद्रगुप्तने बहार निकाली घोडा उपर चडाव्यो मार्गमां जतां चाणक्ये चंद्रगुप्तने पूछ्युं के—' हे चंद्रगुप्त ! में ज्यारे पेला सवारने तुं तळावमां पेठेलो देखाड्यो त्यारे तारा मनमां शुं थयुं? ' चंद्रगुप्ते जवाब दीधो के–मारा मनमां एमज थयुं के आ मारा हितने माटे आपे मने देखाड्यो ? आ सांभळी चाणक्यने निश्चय थयो के—'खरेखर आ कोइ

योग्य पुरुष छे.' ते पछी चंद्रगुप्त क्षुधाथी पीडावा लाग्यो. आ वखते चाणक्ये कोइ स्थानमां एक जन्मेला बटुकनुं जठर फाडीने तेमांथी दधि तथा कांगनो कूर निकालीने चंद्रगुप्तने जमाडयो.

---

ततो ग्रामे ग्रामे भिक्षां कुर्वश्चाणिक्यो भ्रमति. एकदा कस्मिंश्चिद् ग्रामे चाणिक्य एकस्या वृद्धाया गृहे भिक्षार्थं गतः. तत्र तया बालकानां भोजनाय भाजने क्षैरेयी क्षिप्ता, एकेन बालेन मध्ये हस्तः क्षिप्तः, दग्धः स रोदिति तयोक्तं रे मूढ! त्वमपि चाणिक्यवन्न जानासि, चाणिक्येनोक्तं हे मातश्चाणिक्यः कस्मान्मूढः? तयोक्तं पूर्वं पार्श्वानि गृह्यंते ततो मध्ये हस्तः पात्यते भोजने राज्यग्रहणे च.

---

तदनंतर गामेगाम भिक्षा मागतो चाणक्य फरतो तेटलामां कोइ एक गाममां चाणक्य एक वृद्धाने घरे भिक्षा माटे जइ नीकळ्यो त्यां ते डोशी पोताना बाळकने जमाडतां थाळीमां खीर पीरसी एक बाळके थाळीना मध्यमां हाथ नाखतां दाझीने रोवा मंडयो त्यारे डोशी बोल्यां के—' रे मूढ! तुं पण चाणक्यनी पेठे नथी जाणतो? चाणक्ये पूछयुं के 'डोशीमां चाणक्यने मूढ शा उपरथी कह्यो?' ते वृद्धाए जवाब आप्यो के—भोजनमां तथा राज लेवामां प्रथम पडखामां अने पछी वचमां हाथ नाखवो.

---

तत् श्रुत्वा गतश्चाणिक्यो हिमवत्पार्श्वे, तत्र पर्वतनामा परिव्राजको राजा, तेन सह मैत्री कृता चाणि-

क्येन. तस्य प्रस्तावे उक्तं नंदराज्यं लात्वार्धमर्धं त्वया चंद्रगुप्तेन च भुज्यते, प्रतिपन्नं परिव्राजकराजेन. ततः सैन्येन सह द्वावपि चलितौ, मार्गस्थग्रामनगराणि स्वायत्तीकुरुतः. एकदा मार्गे महदेकं नगरमागतं, तद् गृहीतुं न शक्यते, परिव्राजकवेषेण चाणिक्यो नगरमध्ये प्रविष्टः, तदंतरर्देवदेवीमूर्तयः सप्रभावा दृष्टाः, विचित्रया मायया पौरान् विप्रतार्य ताः सर्वा दूरीकृताः, ततो नगरं गृहीतं. क्रमेण ससैन्यौ तौ पाटलीपुत्रपरिसरे गतौ, रुद्धं तन्नगरं, नंदो धर्मद्वारेण निर्गममार्गयत्, ताभ्यामुक्तमेकरथे यावन्माति तावत्प्रमाणं वित्तदारासुतादिकं लात्वा निर्गच्छ? नंदेन तथैव कृतं.



आ सांभळीने चाणक्य हिमालयतळेटो भणी चाली नीकळ्यो. त्यां जाय त्यांतो पर्वत नामना परिव्राजक राजा राज्य करता हता. तेनी साथे मैत्री करी. वातनो प्रसंग चालतां चाणक्ये कह्युं के–नंदराजानुं राज्य लइने अर्ध चंद्रगुप्त भोगवे अने अर्ध तमारे लेवुं. परिव्राजक राजाए आ वात कबूळ करी. बेयजणा सैन्य सहित उपड्या आगळ चालतां मार्गमां आवतां गामडां स्वाधीन करता जाय छे हवे रस्तामां एक महोटुं नगर आव्युं आ नगर गृहण करी न शकाणुं त्यारे चाणक्य परिव्राजकवेष लइ नगरमां पेठो त्यां तो देव तथा देवीनी प्रभाववाळी मूर्तिओ दीठी. विचित्र माया प्रयोगवडे लोकोने छेतरी ए मूर्तिओ दूर करीने नगर लीधुं. क्रमे करी आगळ वधतां सैन्य सहित ते चंद्रगुप्त तथा चाणक्य ए बन्ने पाटलीपुत्र नगरना परिसर=सिमाडासुधी आवी गया. अने नगरने रुंध्युं नंदराजाए धर्मद्वारे नीकली जवा मागणी करी त्यारे चाणक्ये तथा चंद्रगुप्ते कह्युं के–एक रथमां जेटलुं माय तेटलुं द्रव्य स्त्रीओ पुत्र वगेरे लइने नीकली जाओ. नंदराजाए तेम कर्युं.

एका नंदपुत्री रथस्थिता निर्गच्छन्ती पुनः पुनश्चंद्रगुप्तं पश्यति, नंदेन भणितं याहि ? सा रथादुत्तीर्य चंद्रगुप्तरथे गत्वा यावदारुहति तावत्तद्रथे नवारका भग्नाः, अमंगलमिति ज्ञात्वा चंद्रगुप्तेन सा निषिद्धा, चाणिक्येनोक्तमिमां मा निवारय ? नवपुरुषयुगानि यावत्तव वंशो भावीति, प्रतिपन्नं तेन.

---

आ समये एक नंदनी पुत्री के जे रथमां बेठी हती तेणे नीकळतां चंद्रगुप्तने जोयो. नंदे कह्युं के—'जवुं होय तो जा' एम सांभळतांज चट रथमांथी उतरीने चंद्रगुप्तना रथमां चडवा जाय छे त्यां रथना चक्रना नव आरा भांगी पड्या. अमंगल थयुं जाणी चंद्रगुप्ते तेणीने निषेध कर्यो. चाणक्ये कह्युं—'तेणीनुं निवारण मा कर कारण के नव पुरुषयुग पर्यंत तारो वंश थशे. आ सांभळी चंद्रगुप्ते तेणीने रथमां आववा दीधी.

---

अथ परिव्राजकराजचंद्रगुप्तचाणिक्याः पाटलिपुरमध्ये प्रविष्टाः, गता राजगृहे राज्यं द्विधा विभज्य गृहीतं, तत्रैका विषकन्यास्ति, तां दृष्ट्वा परिव्राजकराजः, कामविह्वलो जातः, चाणिक्येन सा तस्यैव दत्ता, तस्याः प्रथमसंगेनैव स विषार्तो जातः, यावता चंद्रगुप्तो विषप्रतिकारं करोति तावता चाणिक्येन भृकुटिः कृता, कर्णे चेमं श्लोकं पठितवान्—

---

अनंतर परिव्राजकराज तथा चंद्रगुप्त अने चाणक्य, त्रणे पाटलीपुरमां दाखल थया, राजगृहमां जइ राज्यना बे भाग करी

चंद्रगुप्त तथा परिव्राजकराजे पोतपोताना भाग संभाळी लीधा. आ नगरमां एक विषकन्या हती तेने जोइने परिव्राजकराज कामातुर थयो. चाणक्ये ते कन्या तेनेज आपी तेना प्रथम संगथीज ते विषपीडित थयो. चंद्रगुप्त तेने माटे विषनो प्रतिकार करवा जतो हतो तेने चाणक्ये भ्रुकुटीथी इशारो कर्यो अने कानमां आ श्लोक संभळाव्यो.

---

तुल्यार्थं तुल्यसामर्थ्यं । मर्मज्ञं व्यवसायिनं ॥ अर्धराज्यहरं मित्रं । यो न हन्यात्स हन्यते ॥ १ ॥ ततश्चंद्रगुप्तस्यस्तत्प्रतीकाराद् दूरीभूतः, परिव्राजकराजस्तु मृतः. ततश्चंद्रगुप्तः संपूर्णं राज्यं करोति, परं नंदमनुष्याश्चौर्येण देशोपद्रवं कुर्वंति. एकदा चाणिक्यश्चौरदमनोपायं चिंतयन्नगराद्बहिर्गतः, तत्र नलदामकुविंदः स्वपुत्रं मत्कोटकैरुच्चाटितं दृष्ट्वा कोपात्तेषां बिलं खनित्वा प्रज्ज्वालयन् दृष्टाः.

---

तुल्यार्थं तुल्यसामर्थ्यं मर्मज्ञं व्यवसायिनं । अर्धराज्यहरं मित्रं यो न हन्यात्स हन्यते ॥ अर्थात्—एक प्रयोजनवाळा समान सामर्थ्यवान् मर्मने जाणनार अने उद्योगी होइ अर्धराज्यनो धणी थनार मित्रने जे न हणे ते पोते हणाय छे. आ सांभळी चंद्रगुप्त तेना उपाय करवाथी दूर खसी गयो अने परिव्राजकराज विष व्यापी जवाथी मृत थयो. त्यारे चंद्रगुप्त संपूर्ण राज्यनो मालिक बन्यो, परंतु नंदराजाना माणसो चोरीथी देशमां उपद्रव करवा लाग्या. एक समये चोरने दमवाना उपायनो बिचार करता चाणक्य नगरनी बहार निकळ्या. त्यां एक नलदाम नामनो कुविंद=साळवी–पोताना नाना पुत्रने मंकोडाए कनेडयो हशे तेथी कुपित थइने मंकोडानुं दर गोती खोदीने बाळतो जोयो.

चाणिक्येन चिंतितं योग्योऽयमिति तस्यैव तलारत्वं दत्तं, पश्चात्स चौरनिग्रहं करोति, प्रत्युत किंचिदुपकारादि न करोति, तेन सर्वेऽपि चौराः प्रगटिता व्यापादिताश्च, जातं निष्कंटकं राज्यं. अथ कोशार्थं चाणिक्य उपायं करोति एकदा पाटलिपुत्रसंबंधिनो व्यवहारिणो भोजनार्थमाकारिताः, भोजनांते तेषां चंद्रहासमदिरा दत्ता, ते विह्वलीभूतास्तावता चाणिक्यः समुत्थाय नृत्यन्नेवं पठति—

चाणक्ये विचार्युं के 'आ वेरवाळनार पाको योग्य छे' आम जाणी तलार=कोटवाळ–तरीके तेने नीमी तेने हाथे चोर निग्रह करावववा मांड्यो. पण तेनो कंइ उपकार कर्यो नहिं. तेणे सर्व चोर प्रकट कर्या अने मारी पण नाख्या, राज्य निष्कंटक थयुं. हवे चाणक्ये खजानो भरवा उपाय आदर्यो. एक वखते पाटलिपुत्र नगरना तमाम वेपारीओने जमवा बोलाव्या जमी रह्या पछी तेओने चंद्रहास मदिरा पाइ तेथी ते बधा विह्वल थया ते वारे चाणक्य उभो थइ नाचतो नाचतो बोल्यो के—

दो मज्झ धाउरत्ताइं । कंचणकुंडिआनि दंडं च ॥ रायावि अ मे सत्थी । इत्थ विना मे होलं बाएहि ॥१॥ इदं श्रुत्वापरः कश्चित्समुत्थायाजन्मतोऽपि यन्न प्रकटितं तद्वदति, इतः सहस्रयोजने हस्तिपददेशे टंककानां लक्षमस्ति, अत्रार्थे ममापि होलं वादय? अपरः पठति मया तिलाढक उप्तोऽस्ति, ततो मम ते तिला बहुलक्षाणां निष्पत्स्यंते, अत्रार्थे ममापि होलं वादय? अन्यः पठति तावंत्यो मे गावः संति, यासां नवनीतेन महागिरिनदीप्रवाहो रुध्यते.

'बे मध्ये धातुरंजीत, कांचन कुंडिका अने दंड; राजा पण मने स्वस्ति न होय, अहीं मारुं होल=अपमानवाचक शब्द बोलावी.' आ सांभळी अपर कोइ उभो थइ जन्मथी मांडीने जे प्रकट नहोतुं कर्युं तेवुं बोल्यो के—'अहींथी एक हजार योजनने अंतरे हस्तिपद देशमां एक लाख टंक=शिक्का छे.–' ए बाबतमां मारी पण होल=अपमान शब्द बोलावो. त्यां त्रीजो उठीने बोल्यो के में तलनुं एक आढक (२५६ तोला) वावेल छे तेमांथी घणा लाखना तल नीपजशे ए विषयमां मारी पण होल बोलावो. चोथो उठीने बोल्यो के–मारे त्यां एटली बधी गायो छे के जेना माखणनो पर्वत नदीना वेगने रोकी दीये माटे मारी पण होल बोलावो.

---

अपरः प्राह तावंत्यो मे वडवाः संति यासामेकदिनजातैः किशोरपुच्छकेशैः पाटलिपुरनभोमंडलं छादयामि. अन्यः प्राह तादृशा में शालयः संति, यद्बीजैः प्रत्यहं शालयो नविना भवंति, अत्रार्थे ममापि होलं वादय ? एवं सर्वेषां वित्तमर्यादां श्रुत्वा चाणिक्येन यथायोग्यं वित्तं गृहीतं. अथ चाणिक्यः सुवर्णोपार्जनोपायं चिंतयन् देवमाराध, तुष्टेन देवेन तस्य जयिनः पाशका दत्ताः.

---

पांचमो उठीने बोल्यो के–मारे एटली बधी घोडीओ छे के जेना एक दिने जणेलां वछेरांना पुंछडाना वाळथी आ पाटलीपुर उपरनुं आकाश छवाइ जाय माटे मारीए होल बोलावो. वळी एक छट्ठो उठीने बोल्यो के–मारे त्यां एवी शाळ छे के जेना वावेतरथी रोज नवी शाळ उत्पन्न थाय छे. आ बाबतमां मारी पण होल बोलावो. आम बधायनी गुंजायश

जाणी लइने चाणक्ये बधा पासेथी यथायोग्य द्रव्य कढाव्युं. पछी चाणक्य सुवर्ण मेळववाना उपायनुं चिंतन करता देवनी आराधना करवा लाग्यो. देवे तुष्ट थइने तेने सर्वने जीते एवा पाशा आप्या.

---

चाणिक्येन तैः पाशकैः कश्चिन्नरः शिक्षितो द्यूतार्थं प्रेरितः, स गृहीतसुवर्णटंककस्थालः पुराभ्यंतरे भ्रमनेवं वक्ति, अहं यदि जयामि तदा सुवर्णटंककमेकं गृह्णामि, मां यद्यन्यो जयति तदा तस्य सुवर्णटंकस्थालमिदं ददामीति श्रुत्वा बहवो जनास्तेन समं द्यूतक्रीडां कुर्वंति, परं हारितेव जना आप्नुवंति, स तु सर्वत्र जयति. एवं पाशकयुक्तस्य तत्पुरुषस्य पराजयो दुर्लभस्तथा मनुष्यत्वप्राप्तिर्दुर्लभेति पाशकदृष्टांतः. ( २ )

---

